तुस्तात्तु पुरुषीयनिखिलशब्दप्रत्यक्षे च तत्तत्पुरुषीयकर्णावच्छिन्नसमवाय इति लाघवम्। किंच व्यंजकत्वेनिमित्तपवनसंयोगादेः कप्रत्य
क्षत्वेजन्यतावच्छेदकं वाच्यम्। उत्पादकत्वमिति लाघवम्। न च व्यंजकत्वे पि लौकिकविषयतयाकत्वमेव तथा। कोलाहलादेः कत्वादेर
ग्रहेपि शब्दत्वादिनाककारादिप्रत्यक्षोदयात्। शब्दत्वादिप्रकारक ककारादि प्रत्यक्षे पृथक् हेतुत्वे तु गौरवम्। एवं ककारादेरुणत्वादेः स्वका
रणेदेः प्रत्यक्षेपि तथात्वे गौरवम्। न च स्वाश्रयविषयितयाकत्वादिकं तथा। शब्दोत्पत्तिनाशकल्पनातो लघुत्वात्तद्वकादिककारादिकमे
वविषयितयातथाकं तात्वाद्यभिघातादयस्तु विजातीयसंयोगप्रयोजकविगिनः। तत्पुरुषीयश्रावणसमवायश्रावणविशेषण

तयोस्तादीयगुणत्वास्वकार्यादिभेदगमहेहेतुतास्त्विति वाच्यम्। श्रावणसमवायेश्रावणस्योपलक्षणत्वे ऽतिप्रसंगतादवस्थ्या

52 र्थवर्णोपणतेतु प्रथमं केवलशब्दप्रत्यक्षस्वीकारे ऽप्रसिद्धेः तात्। एवं नेदृपि नित्यत्वापत्तेश्च। न च सर्वत्र शब्दोत्पादविनाशप्रती

तिध्वनेरेवेति न तदनित्यत्वप्रसंग इति वाच्यम्। वर्णोत्पादकाले सर्वत्र ध्वनेरनुत्पादात्। इति दिक्। अत्र शब्दजनकशब्द

स्य कार्यशब्दः शब्दजनकशब्दस्य कारणशब्दनाशो नाशक इति आद्यस्य कार्यशब्देनैवान्त्यस्य कारणशब्दनाशेनैव मध्यमा

नामुभाभ्यामेव नाश इति संप्रदायः। कारणनाशादेव सर्वेषां शब्दानां नाशो ऽस्तु स्वप्रदेशान्तरे स्वोत्तरजातिशब्दने

नाशासंभवेपि चरमशब्दस्य कारणनाशं विनाऽनाश्यस्य ऽनुपपादतात्। दृष्टं बाधकस्य निमित्तपवनसंयोगनाशादेव

नाशः। तथा च पवनसंयोगस्योत्पत्तितः क्षणचतुष्टयस्थायित्वेन शब्दोत्पत्तिचतुर्थक्षणे निमित्तपवनसंयोगनाशा

त्तं च मक्षणे शब्दनाश इति शब्दस्य क्षणचतुष्टयस्थायितयाकत्वादिविशिष्टो किं कमत्यक्षं स्तु पैदीयमिति बुद्धीधिति क्षम्। अत्र

चिंतनीयं पवनसंयोगनाशत्वेन शब्दनाशहेतुत्वे लेके। नाशत्वेनैव हेतुता स्वप्रतियोगि ऽन्यत्वं कारणस्य स्वप्रतियोगित्वं का

र्यस्य संबंधः। एतेन पूर्वपूर्वनिमित्तपवनसंयोगनाशस्य गगने सर्वदा सत्त्वात् शब्दमात्रं क्षणिकं स्यादिति अपास्तम्। फलतः स्वप्रतियो राम

गि ऽन्यशब्दनाश एव तस्य हेतुताका भावात्। इत्थं च द्वितीयशब्दनाशो आद्यशब्दनाशोपि हेतुः। अत एवाद्यशब्दस्य निमित्तपवन

नसंयोगनाशादेर्नाशइति दीधितावुक्तमित्यन्यो न च मतद्वयेपि निमित्तपवनसंयोगनाशक्षणोत्पन्निष्क्रियत्वाद्यक्षणिकत्वापत्तिः । नि
त्यपवनसंयोगस्योभयत्र संबंधेन कार्यसहभावेन नाशं प्रति हेतुत्वात् । अदृष्टवदकतयाभुक्तीयकर्मकारादेर्नाशकृताद्यभावस्य हे
तुत्वाच्च । अत एव नैकावच्छेदेन सदृशानां नाशश्चेदासज्जिरपि वस्तुतः प्रतियोगितया नाशं प्रति कालिकावच्छिन्नस्वप्रतियो
ग्याधारतायत्ता तादात्म्यसंबंधेन नाशत्वेन हेतुत्वात् ज्ञानादिरूपक्षणद्वयस्य द्विक्षणस्थायित्वे च । अत एव नत्वाद्यस्य न वासस्त्वादिकालोत
त्पन्नसंस्कारादेः क्षणिकत्वमिति दिक् । एकदेशावच्छिन्नत्वमव्याप्यवृत्तित्वं वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नस्वाधिकरणवृत्त्यत्यन्ता
भावप्रतियोगितावच्छेदकधर्मवत्त्वम् । नातः शब्दरूपोभयत्वादिना रूपादेरभावस्य रूपाधिकरणघटादौ सत्वे विरूपादेरव्याप्य
वृत्तित्वम् । अवच्छिन्नवृत्तित्वमव्याप्यवृत्तित्वमित्यपि केचित् । अथ ज्ञानेच्छादेरव्याप्यवृत्तित्वे मानम् । न हि वने सिंहनादः शिरसि
वेदनेत्यादिवच्छरीरे ज्ञानमित्यादिधीरस्ति । न च चेष्टानुरोधात्तथात्वे अवच्छेदकानुरोधादिच्छादेस्तात्वम् । सम्बन्धेन ज्ञाने च्छया
विशेषत्वं गुणत्वव्याप्यप्रदेशवृत्तिसमवायिजनकत्वेन तदनुपपत्तेः । इति चेन्न । कायव्यूहस्थले एकशरीरावच्छेदेन बाधकत्वे शरीरान्तराव
च्छिन्नो विशिष्टवृद्ध्युत्पत्त्यादेस्तत्र बाधबुद्ध्यभावं विनाऽनुपपत्तेस्तत्सिद्धेः । न च सकलकायव्यूहवतः सार्वज्ञ्यमेवम् । असर्वज्ञस्यापि कायव्यूहात् ।
सर्वज्ञस्यापि प्रणिधानं विना भासमसंभवात् । अन्यथा स्वात्ममात्रादिनिमित्तभोगापत्तेः । एवं कामितिरी जितामादेवविरोधित्वादि छाया

४२

अपि तत्सिद्धिरिति दिक्। नन्वेवमपि रूपादेरव्याप्यवृत्तित्वं दुर्वारम्। प्रलये पार्थिवपरमाणावुत्पत्तिकाले चावयविनि रूपसामान्याभावस
त्त्वादिति चेन्न। मानाभावात्। तन्न तस्य च प्रत्यक्षम्। सन्निकर्षाभावात्। न च चक्षुःसंयुक्तमहद्विशेषणतयात्र भावेऽपि तादृशमहत्त्ववत्क
53 पालसमवेतविशेषणतास्त्येवेति वाच्यम्। द्रव्यस्पर्शनचाक्षुषे आश्रयाया एव हेतुत्वात्। घटादावुत्पत्तिकाले सन्निकर्षसत्वेऽपि
द्वितीयक्षणे विषयाभावात् संनिकर्षाभावश्च। नाप्यनुमानमप्रयोजकत्वात्। न च रूपधारावारणाय रूपं प्रति रूपसामान्याभावहेतु
त्वात् रूपोत्पत्तेः प्राक् तत्सिद्धिः। तत्र तत्प्रागभावस्य तत्समवायिनो वा र परिणतरूपे परमाणुगतरूपे च तत्तेजःसंयोगस्य हेतुत्वेन रूपधाराया
असंभवात्। प्रलये पार्थिवपरमाणावुत्पत्तिकाले घटादौ रूपं नास्ती व्यवहारस्तु रूपप्रतियोगिकसंसर्गाभावनिबंधन इति चेत्।
न यास्का। अन्यायितावच्छेदकावच्छिन्नप्रतियोगिताकत्वस्योत्पत्तिसिद्धत्वाद्रूपत्वावच्छिन्नप्रतियोगिताकाभावस्यैव निरूक्तव्यवहारवि
षयः। न च ध्वंसप्रागभावौ तथा संभवतो रूपत्वेन रूपाणामनुत्पद्यमानत्वाद्विनष्टत्वाच्च। किंच विजातीयतेजःसंयोगस्य विजातीयरू
हेतया तत्तद्रूपं प्रति तत्त्वेन तत्त्वेनाहेतुत्वात् ×नद×। वैशेषिकनये परमाणो न्यायनये चावयविन्यपि रूपधारावारणाय प्रागभावास
त्वेऽप्युत्पन्नस्य तु नरूपोत्पादवारणाय यत्र रूपत्वावच्छिन्नाभाव एव रूपहेतुरिति रूपादेरव्याप्यवृत्तित्वं दुर्वारम्। एवमेकत्वाद्येकत्वादिसामान्या राम
भावस्याहेतुत्वात् घटादावुत्पत्तिकाले एकत्वादिसामान्याभावसिद्धिः। स एव च गुणसामान्याभावोऽपि सिद्धः। इत्थं च प्रलक्ष्ये
ह्रे

प्रं

योरुक्तेरादित्यहृतिर्वैस्वकालावच्छेदेन स्वाधिकरणारस्तत्वनाभावः प्रतियोगित्वम्। न चैवमुदयास्तीकारादिसाधुः। दिक्कालयोः पंचगु
णवत्त्वं सर्वेषां निमित्तत्वं परत्वापरत्वानुमेयत्वं चेति भाष्यम्। पंचगुणाः संख्यापरिमाणपृथक्त्वसंयोगविभागाः। सर्वेषामुत्पत्तिमतां
तत्तसंभवेन च्छित्याद्युत्पत्त्यर्थकत्वात् संयोगविभागभिन्नानां निमित्तकारणत्वमित्यर्थः। स्वाचार्याः। यन्मते तत्तन्निमित्तकारणत्वं न तु समवा
य्यसमवायिकारणान्यकारणत्वं। किंतु समवाय्यसमवायिकारणान्यकारणतावत्त्वं। समवायिकारणत्वं च समवायसंबं
धावच्छिन्नकार्यताप्रतियोगिकतादात्म्यसंबंधावच्छिन्नकारणतावत्त्वं। तथा च दिक्कालयोः समवायेन स्वसमवेतच्छित्यो
दिकं प्रति समवायिकारणत्वेपि दैशिककालिकविशेषणताभ्यां जन्यमात्रं प्रति निमित्तकारणत्वमव्याहतमेवेति बोध्यम्।
यद्यपि सर्वोत्पत्तिमन्निमित्तत्वमदृष्टेश्वरादावतिव्याप्तं तथापि आधिकरणतया निमित्तत्वमत्र विवक्षितं। न चैतददृष्टेश्वरादावि
तिभावः। क्षितितेजसोर्नैमित्तिकद्रवत्वं। क्षितौ घृतादौ सुवर्णादौ च तेजसि द्रवत्वमस्ति। तिनैमित्तिकद्रवत्ववद्वृत्तिद्रव्यत्वव्या
प्यजातिमत्त्वं तयोर्लक्षणमिति न घटादावव्याप्तिरिति बोध्यम्। क्षितिभिन्नद्रव्यत्वमप्यनामेवं जलादिभिन्नद्रव्यत्वमपि। क्षि
तिभिन्नानां निर्गंधत्वम्। अंभोविहायनिःस्पर्शत्वं। तेजोविहायानुष्णत्वमपाकजत्वं च। आत्मानं विहाय परार्थत्वमचेत
नत्वं। जलज्योतिरनिलानामपाकजस्पर्शवत्त्वं। जलज्योतिषोरपाकजरूपवत्त्वं। दिक्कालमनसां विशेषगुणशून्य

त्वं च घटादीनां बाह्येन्द्रियाप्रत्यक्षत्वं नीरूपत्वं। आत्मादिमनोनामेणामतींद्रियत्वं। आकाशादीनां निःस्पर्शत्वं। कालादी
नाममूर्तत्वमित्यादि। उभयगुणानां साधर्म्यं तत्र सर्वेषां गुणत्वं। रूपरसगंधस्पर्शपरत्वापरत्वगुरुत्वस्पर्शद्रवत्वस्नेहभा
वनान्यसंस्काराणां मूर्तगुणत्वं। तच्च मूर्तगुणवृत्तिसंस्कारत्वान्यगुणत्वव्याप्यजातिशून्यगुणत्वं शब्दातेन संख्या
बुध्यादिगुणासः। वेगस्थितिस्थापकोभयसाधारणसंस्कारत्वेति। वेगस्थितिस्थापकभावनासाधारणत्वभावेत्तुनोपादेयमिदं। बुद्धिसुख
दुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दानां अमूर्तगुणता। तच्चामूर्तगुणवृत्तिसंस्कारत्वान्यगुणत्वव्याप्यजा
तिशून्यगुणत्वं शून्यां तेन संख्यारूपादिगुणासः। संख्यापरिमाणपृथक्त्वसंयोगविभागानामुभयगुणत्वं तच्चकालवृ
त्तिवृत्तिगुणत्वव्याप्यजातिमत्वं एवंविधत्वत्वादिवोध्यं। रत्यतेन रूपत्वबुद्धित्वादिगुणासः। संयोगविभागद्वित्वद्विपृथक्त्वादीना
मनेकाश्रितत्वं। तच्च स्वाश्रयप्रतियोगिकान्योन्याभावसमानाधिकरणगुणत्वं। नानेकत्वसमानाधिकरणगु
णत्वं। रूपरसस्पर्शगंधैकत्वैकपृथक्त्वपरत्वापरत्वगुरुत्वस्नेहसंस्कारबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मशब्दाना
मेकैकाश्रितत्वं तच्च स्वाश्रयान्योन्याभावव्यापकाभावप्रतियोगित्वं। रूपरसगंधस्पर्शस्नेहसांसिद्धिकद्रवत्वबु
द्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दानां वैशेषिकगुणत्वं। तच्च भावनाभिन्नवायुवृत्तिवृत्तियतिस

शीरत्रिधर्मे समवायान्यत्वे सति गुरुत्वजलरवृत्तान्यगुणत्वं । ~~कृप्रमसं पूर्वैके लोके संयोगि विशेषत्वं~~ स्पर्शो रहितसंख्यात्वादिम
म्वायिसंख्यात्वादिनवकृत्वारणाग्रसत्वं । तमासंग्रवगारणाय स्पर्शसंग्रहाय च स्पर्शोरस्मिन्नीति । भावनासंग्रहाय भिन्नातं समवायिविशेषगु
णं । गुरुत्वनैमित्तिकद्रवत्वयोः कारणमात्यातं । संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वनैमित्तिकद्रवत्वभावनान्यसंस्कारा
णां स्थानां सामान्यगुणत्वं । भावनान्यसंस्कारो वेगः स्थितिस्थापकश्च । तत्र निरुक्तविशेषगुणान्यगुणत्वं । शब्दस्पर्शरूपरसगंधानां वाह्यैकैकेन्द्रि
यग्राह्यत्वं । तत्र रहितेन्द्रियद्वयावेद्यवहिरिन्द्रियवेद्यगुणत्वसाक्षाद्व्याप्यजातिमत्त्वं चक्षुरादिमात्रग्राह्यत्वे आत्मवात्रिंद्रियपरिमाणादिमत्त्वेत
गारणायसाक्षादिति । संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वस्नेहद्रवत्ववेगानां द्वादशानां द्वीन्द्रियग्राह्यत्वं । तत्र चाक्षुषस्पर्शी
ननिर्विकल्पकविषयगुणत्वव्याप्यजातिमत्त्वं बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नानां प्रत्यक्षं मनः करणमात्रत्वं । तत्र भवधात्मविशेषगुणा इति
गुणत्वव्याप्यजातिमत्त्वं । गुरुत्व धर्माधर्मवेगान्यसंस्कारत्वाणामतीन्द्रियत्वं तत्त्वलौकिकप्रत्यक्षाविषयगुणत्वव्याप्यजातिमत्त्वं । शब्दज्ञानरूपा
दिजनकतावच्छेदेनिमित्तिमजं पचनाकाशसंयोगात्ममनयोगतेजःपरमाणुसंयोगादिगतवैजात्यकारणायसाक्षाद्व्याप्येति । तत्र वेगसंस्कारत्वा
न्यगुणत्वव्याप्यजात्यव्याप्यत्वे सति गुणवृत्तित्वं । भावनात्वस्थितिस्थापकत्वोपसंग्रहाय संस्कारत्वान्येति निष्प्रयोजनेनावासना अन्यतायवच्छे
दकादृष्टत्वसत्वेतद्वातायधर्माधर्मयोर्लक्षणसंगतिः । अपाकजरूपरसगंधस्पर्शपरिमाणैकत्वैकपृथक्त्वगुरुत्वद्रवत्वस्नेहभावनाख्य
संस्काराणां कारणगुणपूर्वकत्वं । अपाकजं पाकं विना जातं पाकाधीनजन्मवदिति यावत् । तेनानित्यवर्गस्यापि व्युदासः ॥

57 वेगोऽत्र कर्मजोऽन्योऽपि ग्राह्यः। तथा च स्वाश्रयसमवायिभिन्नत्वसमवेतासमवायिकारणान्यत्वे सति स्वाश्रयसमवायिसमवेतकारण
त्वं कं भवति हि घटादिरूपादिकं स्वाश्रयघटादिसमवायिकपालादिरूपादिमात्रासमवायिकारणकं। कपालाकाशसंयोगा
दिजन्यघटाकाशसंयोगादेर्घटकपाले कृत्वादिजन्यघटकपालद्वित्वादेश्च वारणाय सत्यंतं। स्वत्वं तद्घटकत्वपदस्य प्रतियोगि
परत्वात् बुध्यादिवारणाय विशेष्यं। बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दानामकारणगुणपूर्वकत्वं। तत्र विभुविशेष
बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दतत्परिमाणोत्तरसंयोगनैमित्तिकद्रवत्वपरत्वापरत्वपाकजानां संयोगासम
वायिकारणकत्वं। भावनायां तु आत्ममनोयोगः शब्दे हि भागाजन्यशब्दे भेर्याकाशसंयोगः उत्तरसंयोगे संयोगजसंयोगे
अवयवसंयोगः। संयोगो द्विविधः कर्मजः संयोगजश्च विभागश्चैवं चरमपठितत्वादुत्तरत्वं। नैमित्तिकद्रवत्वे तेजःसंयोगः
परत्वापरत्वयोर्दिक्कालसंयोगः। पाकजे तेजःसंयोगोऽसमवायिकारणं। लीलावतीकारस्तु भस्मीभावदशायां गुरुत्वापकर्षदर्श
नात् तदनुपपत्त्या गुरुत्वमपि पाकजं मेने। आचार्यास्तु कारणगुणपूर्वकमध्ये गुरुत्वेऽपाकजत्वं विशेषणमप्रवेशयंतो गुरुत्वं पाकजं
नेत्याचख्युः। युक्तं चैतत्। कणांचिदवयवानां निर्गमनादेव गुरुत्वापकर्षसंभवे परमाणावुत्कृष्टगुरुत्वनाशोऽपकृष्टगुरुत्वस्वीका राम
रे मानाभावात्। परिमाणसाम्यं तु अवयवयात्। परत्वापरत्वद्वित्वद्विपृथक्त्वादीनां बुद्ध्यपेक्षत्वं। देशकालाभ्यामपि प्रकृष्टत्वसंभि

दृष्टत्वबुद्धिः परत्वापरत्वे। एकत्वद्व्यादिधी द्वित्वे ऽधी। एकपृथक्त्वद्व्यादिधी द्विपृथक्त्वादौ निमित्ते। रूपरसगंधस्पर्शशब्दपरिमाणैकपृथक्
त्वस्नेहा मांसजातीयारंभकत्वं। अवयवगतरूपादयोऽवयविनि रूपादिकं। शब्दः स्वाश्रये शब्दं जनयति सुखदुःखेच्छाद्वेषप्रयत्नाः स्वसमा
नजातीयारंभकाः। सुखमिच्छां दुःखं द्वेषं तौ प्रयत्नं प्रयत्नः श्रेष्ठं। सुखदुःखयोर्विद्यमानयोरपि ज्ञानमेवेच्छाजनकं। अनागतसुख
दे जनकत्वासंभवेन तज्ज्ञानस्य तत्त्वात् द्विषोऽप्रेष्टिविरोध्येव निवृत्तिस्तत्प्रत्यभावस्येति नव्याः। सुषुप्तिदशायामप्रयत्नो निवृत्तः इ
च्छायत्नहारेण निवृत्त्यास्य पल्लसिद्धिर्दुर्बोधेत्यन्ये। संयोगविभागसंख्यागुरुत्वद्रवत्वोष्णस्पर्शज्ञानधर्माधर्मसंस्काराणां स
मानासमानजात्यारंभकत्वं। संयोगाद्विजातीयं द्रव्यादि विभागाच्छब्दः। संख्यातः परिमाणं। गुरुत्वात्पतनं। द्रवत्वात्स्यं
दनं। उष्णस्पर्शात्पाकजाः। ज्ञानादिच्छादि। धर्मात्सुखं। अधर्माद्दुःखं। संस्कारात् क्रियास्मृती इति विजातीयवर्गः। सजाती
यां प्रसिद्धः। अत्र स्नेहासंग्रह इति सोऽपि लक्ष्य इत्याचार्याः। स्नेहस्य संग्रहे न साक्षात्कारणत्वं। सक्तुजलयोरिव सक्तोरपि
संग्रहो दयात्। किंतु परंपरया वाच्यं। तथा च जलसंयोगत्वेनैव कारणत्वमुचितं। स्नेहस्तु दृढरूपवदन्यथा सिद्धः। आस्तां
स्वाभाविकद्रवत्ववसंयोगत्वेन तत्त्वं। एवं चाद्भुतहिमकरकासंयोगव्यवच्छेदः। विलक्षणतेजःसंयोग एव पाकजहेतुर्न तूष्णस्प
र्शोऽपि तथा संस्कारो भावनेतर एव ग्राह्यः। भावनायाः सजातीयाजनकत्वात्। ननु भावनायाः पटुतरभावनाजनक

५८ न्यपद्धतदत्वं यत्तच्छोपरनामको ऽतिशयो ऽस्तीति स्मृतिरूपकार्यप्रयोतकः तत्र संस्कारद्वारा पूर्वस्मृतिः द्वितीयस्मृतिः साक्षाद्

58 वहेतुः । तदुक्तं ज्यायते हि पुनः पुनः स्मरणाद्दृढतरः संस्कार इति । अत्र स्मृतित्वेनैव हेतुत्वं स्वजन्यसंस्कारः समवायसंबंधेन

स्वेकाल चेत् घुक्तं । आद्यस्मृत्या नाशक्षणे तादृशसंस्कारोत्पत्त्यापत्तेः । किंतु स्वजन्यसंस्कारजन्यस्मृतिसंबंधेन स्मृतित्वेनै

व हेतुत्वेत्यर्थः । नेदमपि सम्यक् । स्वस्वद्वितीयक्षणोत्पन्नस्मृतिः ध्वांदंडविशिष्टचैत्रस्य स्मृत्या कुंडलविशिष्टचैत्रानुभवसहितया चैत्रांशे

दृढतरसंस्कारानुत्पत्त्यापत्तेः । तस्मात्स्वप्रयोज्यस्मृतिसंबंधेन हेतुता विशिष्टसंस्कारस्य । ततः कालेन ×जन्यस्मृति× या विकुं

डलविशिष्टस्मृतिहेतुत्वान्नानुपपत्तिरिति चेन्न । स्मृतित्वे [illegible] प्रतिसंधानविषयांतरासंचारादिनैव सादृश्यस्यैतत्प

मोने [illegible] तासांतरे मानाभावादित्यर्थश्च । स्मरणेच्छाधीनत्वस्य चिंतासहकारिणी दृढसंस्कारस्य रोगानाश्रयस्य तत्त्वा

द्य स्प पररूपता द्वयावद्ध चिंतेत्यपाकः । बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नभावनाशब्दाः स्वाश्रयसमवेतविशेषगुणारंभकाः । बुद्धिरिच्छा

दिकं सुखदुःखे इच्छाद्वेषावितिप्रांचः । इच्छाद्वेषादिकं द्वेषो द्वेषादिकं शब्दः शब्दमिति । रूपरसगंधस्पर्शपरिमाणस्नेहप्रत्ना पराणरंभकाः

अवयवरूपादयः स्नेहोता आश्रयविनिरूपादिकमारभंते । प्रयत्न आत्मनि चेष्टाशरीरे चेष्टां । संयोगविभागसंख्यैकपृथक्त्वगुरुत्वद्रवत्व राम

वेगस्नेहप्रयत्नधर्माधर्मास्तूभयत्रारंभकाः । संयोगाद्द्रव्येत्वाश्रयेभेरीदंडादिसंयोगे नभसि शब्दं । वंशादले योधि भागो विभागं स्वा ॥ ५८

क्रि ४ स्वा २

आश्रये शब्दमन्यत्र। संख्या ख्यात्वाश्रये द्वित्वादिकं। अवयवगतोऽवयविनि संख्यां परिमाणं च। एकपृथक्त्वं आश्रये द्विपृथक्त्वादि अन्यत्रैकैकपृथक्त्वमेव। एकपृथक्त्वाद्विपृथक्त्वादीनामकारणत्वप्रतिपादनाय। गुरुत्वं स्वाश्रये पतनमन्यत्र गुरुत्वमेव। द्रवत्वं स्वाश्रये स्यन्दनमन्यत्र द्रवत्वमेव। वेगः स्वाश्रये गमनमन्यत्राऽवयवगतोऽवयविनि वेगं। धर्मः स्वाश्रये सुखमन्यत्र ज्वलनादौ क्रियां। अधर्मः स्वाश्रये दुःखमन्यत्र पवनादौ यां। स्नेहः स्वाश्रये संग्रहमन्यत्राऽवयवगतोऽवयविनि स्नेहमेव। प्रयत्नो विहितविषिद्धरूपः स्वाश्रये धर्माधर्मौ शरीरे चेष्टामिति। गुरुत्वद्रवत्वद्रवत्ववेगस्थितिस्थापकप्रयत्नधर्माधर्मसंयोगविशेषाः क्रियाहेतवः। गुरुत्वात्पतनं। द्रवत्वात्स्यन्दनं। वेगाद्गमनं। प्रयत्नाच्चेष्टा। धर्माधर्माभ्यां भूकंपादि। संयोगविशेषाच्चोदना। अभिघातलक्षणादिष्वादिकर्म। स्थितिस्थापकान्नमनोन्नमने इति। द्रपरसमवेधानुसमस्पर्शसंख्यापरिमाणैकपृथक्त्वस्नेहशब्दानामसमवायित्वं। अवयवरूपादिकमवयविरूपादेरसमवायिकारणं। शब्दः शब्दस्य द्वित्वादिसंख्यापरिमाणस्य। अत्रासमवायित्वमिति सावधारणं। तेन निमित्तकारणस्यात्वे समस्तसमवायिकारणत्वं नोद्दंकं। तेनोष्णस्पर्शादिव्यादासः। नन्विदमंऽप्यवयविवृत्तिरूपादावव्याप्तं तेषामसमवायिकारणत्वाभावात्। किं च रूपादीनां धर्माधर्मोत्पत्तौ स्वध्वंसप्रत्यक्षयोश्च निमित्तत्वादव्याप्तिः॥

हृ १२ कु २

१ कारण ४

प. मा नचात्रमानाभावः। अन्यथा रूपणायेत्यादिश्रुतेः। आरूपणादेर्विशेषणत्वे संभवत्युपलक्षणत्वायोगात्। एवं रसस्य जीव
५९ नपुष्टिबलारोग्यनिमित्तत्वादव्याप्तिः। तथा स्पर्शवेगसापेक्षैव [illegible] क्रियाभिघातहेतुरिति स्पर्शस्याभिघातेऽस्ति हे
59 स्य च संयोगहेतुनिमित्तत्वादव्याप्तिः। अतिव्याप्तिश्चक्षुपात्ताकाशसंयोगादाविति चेत्। आत्मधर्मेतरजीवनपुष्ट्यादि
भिन्नैकाश्रितनिमित्तकारणावृत्तसमवायिकारणावृत्तिपृथक्त्वान्यत्वसंख्यातिमहत्त्वेत्वस्य विवक्षितत्वात्। अत्र
वृत्तपदेन संयोगविभागवेगादिनिरासः। संयोगविभागयोः शब्दनिमित्तत्वात्। वेगस्याभिघातजक्रियानिमित्तत्वा
त्। गुरुत्वस्यैव वेगस्याप्युत्कर्षेणाभिघातजक्रियोत्कर्षात्। नौकागमनविशेषेऽम्बुद्रव एव जायत इति द्रवत्वस्य नौ
कागमननिमित्तत्वान्नातिव्याप्तिः। यदि च कठिनद्रव्यसंयोगस्यैव नौकागमनविरोधित्वमत एव सक्तुपिण्डवद्द्रव्यसंयो
गे पाषाणादिप्रतिबन्धात् गमनमिष्यते। तदा द्रवत्वान्येति विशेषणान्नातिव्याप्तिः। वृत्तपदेन परत्वादिनि
रासः। द्विपृथक्त्वादिवारणाय पृथक्त्वान्येति जातिविशेषणमेकपृथक्त्वे तु गेहस्वभावादायुलक्षणासङ्गतिः। उ
ष्णस्पर्शस्य पाकजनिमित्तत्वाद्वारणोपनुद्दतोष्णस्पर्शस्यापि। द्विपकस्य च वारणाय पर्यवसन्नमिति उष्णत्वव्याप्य
मनुष्णत्वं द्विनिष्ठापकत्वं च न पर्यवसन्नमिति न दोषः। कर्मवारणाय गुणत्वं व्याप्यक्रियमन्यासमवायिकारणत्वं न रम
५९

कार्यकार्थप्रत्यासत्त्याकारणत्वं त्वं तु रूपादौ पटरूपादेस्तदभावान्नापिकारणैकार्थप्रत्यासत्त्यानत्वं शब्दे श
ब्दस्य तदसंभवान्नापिकारणैकार्थप्रत्यासत्त्यानत्वं संयोगादेर्विभागादिकं प्रति तुरीसंयोगादेः
पटादिकं प्रत्यसमवायिकारणत्वापत्तेः ॥ नच संयोगादिकमपि किंचित्कार्यं समवायिकारणं भवत्येव का
र्यविशेषासमवायिकारणलक्षणे तु तत्तत्कारणान्यत्वमपि निवेश्यमिति वाच्यं ॥ निमित्तपवनाकाशसंयो
गमनोगगनसंयोगादेः कार्यमात्रासमवायिकारणभिन्नस्य शब्दविभागाद्येकार्थसमवायप्रत्यासत्त्याहे
तोरसमवायिकारणतापत्तेः ॥ किंच ज्ञानादेरिच्छाद्यसमवायिकारणत्वं स्यादिति चेन्न आत्मविशेषगुणा
कार्य
न्यत्वे सति कारणान्यतरैकार्थप्रत्यासत्त्याकारणत्वस्य तत्वात् कारणासमवायि तेन पाकजादिकारणतेजःसं
योगाद्येकार्थसमवेतस्योष्णस्पर्शादेर्नपाकजादिकं प्रत्यसमवायित्वं यद्यत्कार्यस्य नाहृश प्रत्यासत्त्याकारणो
पन्नास्तसमवायिकारणत्वव्यवहारस्तत्तत्कार्यप्रतियोगिकतत्तद्व्यक्तिभिन्नत्वेन कारणत्वविशेषणान्न संयोगा
द्यवच्छिन्नादिः विभागप्रतियोगकसंयोगव्यक्तिभिन्नत्वपटादिप्रतियोगिकतुरीसंयोगादिव्यक्तिभिन्नत्वादिना वि
भागाद्यसमवायिकारणत्वे च संयोगादिभिन्नत्वं निवेश्यतामिति वाच्यं सामान्यलक्षणस्यैव तत्तत्कार्यविशेषित
२ विशेषणान्नयत्वादिप्रवेशनादननुगमः ॥ नच सामान्यतोऽसमवायिकारणत्वे निमित्तपवनसंयोगादिभिन्नत्वं विर

स्पर्शविशेषलक्षणत्वायकारणताविशेषं पुरस्कृत्यैव समवायिकारणत्वव्यवहाराय निरुक्तकारणतासत्त्वस्या
समवायिकारणतानालक्षणत्वाय चोक्तप्रकाराश्रयणात्। आत्मविशेषगुणानां तु न किंचित्कार्यं प्रत्यसमवा
यिकारणत्वम् अतस्तदन्यत्वमेवोक्तम्। (तु आ)त्मविशेषगुणान्यत्वे सति नित्य हि शब्दस्यासमवायिकारणत्वाभावव्याप्य
जातिसमानाधिकरणधर्मसमवायित्वतादृशकारणत्वाभावव्याप्यं च परत्वापरत्वद्वित्वपृथक्त्वादिकं
तत्समवायित्वं रूपादेः। मनोगगनसंयोगादयस्तु सामान्यतो मवं त्वेवासमवायिकारणानि। विशेषे तु पूर्वोक्तै
र्गतिरिति तत्त्वं। निमित्तपवनसंयोगाद्विदधत्वपरममहत्त्वयोरपि सामान्यतस्तद्व्यवहारभाजनयोरव्याप्तेः
। असमवायिकारणत्वव्यवहारस्य कारणताविशेषपुरस्कारेणैव निर्वाहाच्चेति दिक्॥ बुद्धिसुखदुःखेच्छाद्वेषप्रयत्न
धर्माधर्मभावनानां निमित्तत्वं। संयोगविभागोष्णस्पर्शगुरुत्वद्रवत्ववेगानामुभयथा कारणत्वं। परत्वापरत्वद्वि
पृथक्त्वादीनामकारणत्वं संयोगविभागशब्दात्मविशेषगुणानामपदेशवृत्तित्वं। ननु संयोगादेरव्यापदेशवृत्ति
त्वमयुक्तं। अत्यंताभावत्वावच्छेदेन प्रतियोगिनाविरोधकल्पनादिति चेन्न। स्वलक्षणेन कपिसंयोगाद्यभावाव
च्छिन्नवृत्तिताया मूलावच्छेदेन तदत्यन्ताभावासिद्ध्योक्तविरोधासिद्धेः। घटाद्यत्यन्ताभावस्य पदादिना विरोधाभावेन

स्वत्वप्रतियोगिसमानाधिकरण्यरूपविरोधस्य विशेषविश्रान्ततया संयोगात्यन्ताभावे तदकल्पनाच्च । न चाद्या
घवच्छिन्नकपिसंयोगवदव्यवृत्तित्वस्याप्याद्यवच्छिन्नत्वं तद्धर्मिककपिसंयोगादिनिरूपितावच्छिन्नप्रतिबध्नाना न वि
षयत्वस्य च कपिसंयोगाद्यत्यन्ताभावे कल्पनामपेक्ष्यावच्छिन्नत्वमपहाय तद्व्यकल्पनैव लघीयसीति वाच्य
म् । सामानाधिकरण्येन तथैव कल्पनादन्यथाविरोधाकल्पन एव लाघवात् भावाभावकल्पनैव न स्यात् । किं चाद्या
घस्यापि कल्पनत्वात् तत्कल्पनेन गौरवं व्याप्यवृत्तित्वाव्याप्यवृत्तित्वभ्रमसंभवात् द्वितीयस्यापि तथा । नैवं क
पिसंयोगिभेदो व्याप्यवृत्तिः स्यादिति वाच्यं मूले वृक्षो न कपिसंयोगीति प्रतीतेर्नियतोपछितिकपिसंयोगाद्या
घवच्छिन्नात्यन्ताभावविषयतयैवोपपन्ने भेदाव्याप्यवृत्तित्वाकल्पनादिति प्राञ्चः । न व्यापककपिसंयोगादिमद
व्याप्यवृत्तिः । न कपिसंयोगीति भेदत्वप्रकारितायाः अन्यत्र प्रतीतेः स्थाने प्रतीतेस्त्वात्यन्ताभावत्वप्रकारक
त्वात् स्वभ्रमशक्यत्वात् । सहस्रेणापि वाक्यैरिदं रजतमिति प्रतीतेरंगत्वस्य समर्थयितुमशक्यत्वात् । अनुयो
गिनि सप्तमी विनाशाष्टप्रतीतेर्निपातातिरिक्तनामार्थात्यन्ताभावत्वप्रकारकत्वायोगाच्च । अन्यथा घटो न पट

पमा. इत्यादिवाक्यस्य योग्यत्वापत्तेः। न च वृक्षो न कपिसंयोगवान्मूलमत्र मतुप्समभिव्याहृतनञर्थे मतुप्प्र[illegible]त्यर्थान्व
६१ यः। परेषां न कलंजं भक्षयेदित्यादाविव मतुबादिघटितान्यर्थानिरिक्तनामार्थत्वे तत्र भावबोधे च वानुयोगिनि
61 सप्तम्यपेक्षेति वाच्यम्। तादृशकल्पनायां गौरवात् त्वाक्रान्तो नञ्पदमड्यादेः शपामत्वादेः अपरविशेषणतास्पन
न्नर्थेऽन्वयासंभवाच्च। युक्तं च भेदाव्याप्यवृत्तित्वे कपिसंयोगाद्यत्यन्ताभावस्येव कपिसंयोगप्राहिभेदत्वे लाघ
वात्। न चैवं कपिसंयोगो न कपिसंयोगवानित्यपि वाक्यं योग्यं स्यात्। कपिसंयोगात्यन्ताभावस्य भेदरूपस्य कपिसंयोगे
सत्त्वादिति वाच्यम्। अनुयोगिप्रतियोगिवाचकपदयोः समानविभक्तिकत्वे तादात्म्यसंबंधावच्छिन्नप्रतियोगिताक
त्वस्य संसर्गत्वात्तु। कपिसंयोगभेदत्वविशिष्टस्य कपिसंयोगेऽसत्त्वाच्च। स्यादेतत्। शपामाड्क्तो विधमीनत्तुष्टथगिति
प्रतीतेः पृथक्त्वं अन्योन्याभावरूपं व्याप्यवृत्तिसिध्यतीति केचित्। एतावता न तत्त्वाक्तित्वावच्छिन्नान्योन्याभावस्य पृथक्त्वरूप
पतास्तु। शपामायवच्छिन्नान्योन्याभावाश्रयव्याप्यवृत्तित्वे तु द्रव्यारंभितानां रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वैक
गुरुत्वद्रवत्वस्नेहवेगस्थितिस्थापकपरत्वापरत्वानामाश्रयव्यापित्वं। आपाकजरूपरसगंधस्पर्शपरिमाणैकत्वै राम
क पृथक्त्वसांसिद्धिकद्रवत्वस्नेहानां यावद्द्रव्यभावित्वं विशेषाणाम् यावद्द्रव्यभाविकत्वं सांसिद्धिकद्रवत्वरूपरसगंधस्प ६१

शी॥स्नेहानां द्रवत्वस्थितिस्थापकानां स्पर्शव्याप्यत्वं॰ स्नेहशौस्पर्सां सिद्धिकद्रवत्वानां जलमात्रवृत्तित्वं॰ उष्णभास्वरत्वयोस्तेजोमा
त्रवृत्तित्वगोधमा धुर्यतरसमसुरुतरसूपारणाः पृथिवीमात्रवृत्तित्वं क्षुधादिभावनांतानां आत्मविशेषगुणत्वं॰ बुद्धीछाद्वेषप्र
यत्नाभावनानामेव सविषयकत्वं॰ इच्छादीनां ज्ञानकज्ञानविषयत्वेनैव विषयत्वव्यवहार इति प्राचः॥ कार्यकारणभावाव
च्छेदकत्वेन व्यवहारबलेन च ज्ञानवदिच्छादेरपि साक्षादेव विषयैरिति नव्याः॥ अथ भावनायाश्च दृष्टवत्त्वं विषयकत्वमेव
युक्तं॥ अपाकजेति द्रवत्वेप्यनुषज्यते॰ कविद्गाघिसांसिद्धिकद्रवत्वे तिपाठः स हेयः॥ वैशेषिकनयेवयविपृथिवीद्रवत्वस्याप्या
श्रयनाशादेव नाशेनलसत्वात्॰ न चैवं परमाणौ तेजः संयोगनाशान्न द्रवत्वनाशेप्यवयविनि द्रवत्वोपलंभापत्तिः
फलबलेन तत्राश्रयकल्पनादिति॰ उक्तं हि गुणदीधितौ॥ रूपादिवद्वयवि द्रवत्वस्याश्रयनाशादेव नाशादुक्तिर्युक्ते
चैतन्त्र्यमतेवयविद्रवत्वस्यापाकजन्यात्वेन यातत्राशनानाशप्रत्वायोगात्॰ तेन्न द्विशेषकृतत्वस्य कारकस्मृतिप्रतितत्र द्वि
शेषकतत्रसकारक निश्चयस्य स्वजन्यभावनासंबंधेन हेतुत्वात्त्रातिप्रसंगः॥ यत्त एवं सति घटांशेउपेक्षात्मकानुभूतत्वे
घटवत्पटवत्वेति निश्चयात् घटांशेपि स्मृतिप्रसंगः॥ स्वजन्यभावनायाश्च पटांशेस्म नुरोधेन स्वीकारात्॰ न चोपेक्षा
त्मकस्य स्मृतिहेतुतावच्छेदके निवेशाद्दोषः॥ सर्वांशोपेक्षात्मकानं तत्भावनाकल्पनाभयेनोपेक्षात्मकत्वेन भावनोपगमेव

पं.मा
६२
62

हेतुत्वादितिनत्तुच्छंप्रांशिकोपेक्षाभेदानांस्मृतिहेतुतावछेदके संवीशोपेक्षाभेदानांभावनाहेतुतावछेदकेप्रवेशेनैवसामंजस्या
त्।नचममनस्दंशेउपेक्षामात्रस्यतदंशेउपेक्षात्वेनातितो ऽन्यतमत्वादिरूपेणाभेदएषभाव नाहेतुतावछेदकेप्रविष्टः।तत्र
तुहेदेधातद्वेदं ऽत्रवेशेगौरवमितिवाच्यम्।ममभावनात्वावछिन्नंप्रतिसप्रविशिषुपेक्षामात्रस्यभेदविशिष्टसप्रकारकज्ञान
त्वेनस्मृतित्वावछिन्नंप्रतिचभावनात्वेनैकैकस्यहेतुमङ्गावः।तदंशोत्प्राशिकोपेक्षाभेदविशिष्टतत्तद्विशेष्यकतत्तत्प्रका
रकनिश्चयत्वेनतादृशस्मृतित्वेनिमनुभावस्मरणोरिवनानाहेतुहेतुमद्भावः।तत्वत्वनुभवसंस्कारयोः स्मृतिसंस्कारयोश्च
नानाहेतुहेतुमद्भावाद्भ्यतिगौरवादिति।किंचिदेतत्त्वत्रनवाः।समानाकारफलस्यभावनानाशकत्वात्भावनायाःस्व
विषयकत्वसिद्धिः।नचस्मृतिसंरणोत्पन्नसंस्कारस्यक्षणिकत्ववारणायफलस्वस्या वाच्यम्।तथाचतन्नव्यक्तित्वेनैवनाश
कत्वयुक्तमितियोगितयातादृशभानानाशहेतुत्वस्यानुगतत्वात्।नचतत्पुरुषीयभावनासामान्यनाशंप्रतिभावनासामा
न्या नाशप्रस्येववानसुरूपायचरमस्मृतिव्यक्तेस्तत्वेनचरमस्मृतिमात्रस्यवाचैजात्येनहेतुत्वमितिवाच्यम्।एवंसतिजनितोपे
क्षात्मकचरमस्मरणकानामपिभावनानांस।त्वोपगमेनाम्यः स्मरणत्पत्तिप्रसंगात्।त्त्वचोद्बोधकाभावान्नतथा।सदशसंब
धाद्यात्मकपघ्यक्तिज्ञानादेव्यघत्तुरूषस्यसतिसंस्कारेदृवश्यंपघदर्थस्मृतिस्तत्रतत्पुरुषीयतत्तदर्थस्मृतौतत्तद्व्यक्तिज्ञानत्वे राम
६२

६२

६४ तद्भावनाजन्यचरमफलस्यैवतद्भावनानाशकत्वमस्त्विति वाच्यं। जनकतयातद्विशेष्यकतत्प्रकारकस्मृतेःप्रति ४४

नैवोद्बोधकत्वेनतन्नसत्वादन्यथोद्बोधकस्यैवविशिष्टस्मृतिहेतुत्वेनानतिप्रसंगेऽनुभवस्यापितद्धेतुत्वंनस्यात्। एतेनध्वंस
एवव्यापारोऽस्त्वित्यपास्तं। रोगादिनापिभावनायाअविनाशप्रसंगाच्च। किंचविशिष्टवैशिष्ट्यविषयिण्यवच्छिन्नप्रतिविशेष
णतानवच्छेदकभावाप्रकारकविशेषणतानवच्छेदकप्रकारकत्वेनैवहेतुत्वात्। विशिष्टवैशिष्ट्यस्मृत्यर्थंविशेषणतानवच्छेद
कप्रकारकभावनासिद्धिः। नचतादृशप्रत्यक्षप्रत्ययेनतथाहेतुता। प्रत्येकत्वनिवेशेगौरवात्। रक्ततरदंडाभाववान्पु
रुषइतिज्ञानसत्त्वेवान्। दंडव्याप्यवान्पुरुषइतिपरामर्शात् दंडीइत्यनुमितिसंशयकालेविरक्तदंडवान्पुरुषइ
त्यनुमित्यापत्तेश्च। नचतादृशविशेषणतानवच्छेदकप्रकारकत्वेनहेतुत्वेतत्संशयेपिदंडोरक्तइत्यनुद्बुद्धभाव
नात्तत्कानुमितेरुपनीतभानस्यचायत्निर्दंडवारेतिवाच्यं। विशेषणतानवच्छेदकाभावप्रकारकज्ञानाभावविशि
ष्टविशेष्येणतानवच्छेदकप्रकारत्वेनहेतुत्वात्। नोपादेयमेवविशिष्टांतं। विशेषणतानवच्छेदकाभावप्रकारकज्ञा
नस्यविशेष्येविशेषणमितिन्यायेनविषयित्वावच्छिन्नप्रतिबंधकत्वेनैवानतिप्रसंगात्। संशयनाशएवस्मर
णकालीनविशेषणतानवच्छेदकप्रकारकनिश्चयात्फलोत्पत्तिः। एतन्निश्चयविरहवि[illegible]
विशिष्टस्यवाविशेषणतानवच्छेदकाभावप्रकारकज्ञानस्यप्रतिबंधकत्वं। किंचतत्तद्बोधकाभावविशिष्टभा

प.मा
६३
63

क्तात्वाभावस्यानिवेशात्तादृशभावनातउक्तानुमित्याद्यापत्तिः। न चैवं तन्निवेशे गौरवं, कार्यतावच्छेदके प्रमात्वानि
वेशात् एतावतैव भावनायाः स्मृतिहेतुत्वनिर्वाहात् उद्बोधकानां स्मृतौ हेतुत्वानङ्गीकाराद्धानिलाघवात्, तत्तद्वि
षयकाभेदज्ञानस्य तत्तत्संशयस्य च तत्तद्विषयकभावनाप्रतिबन्धकत्वादविभावनायाः सविषयकत्वमित्यप्याहुः
।यदि च समूहालम्बनात् विशिष्टवैशिष्ट्यानुभवाच्च नानासंस्कारोपगमाद्भावनानाशकत्वे समानोऽकारत्वं न तत्र.
न च निर्विषयकत्वेन नानासंस्कारोः किंवित्करः। घटपटावित्यादिसमूहालम्बनजनानासंस्कारस्याप्यविशेषाद् घ
टादिस्मृतिहेतुता। यानत्स्मृतिनाश्यत्वादिनियाज्यं घटादिघटवदादिस्मृतिप्रतिसंस्कारस्य विभिन्नत्वेन वैजात्ये
न व्याप्यव्यापकभावस्यात्रे न मिथो विरुद्धनवान्तर्हि जात्या वृत्तित्वे च घटादिघटवदादिज्ञानत्वेन तत्तज्ज्ञानी
यसंस्कारानीयसंस्कारनाशं प्रति च घटादिघटवदादिस्मृतित्वेन हेतुत्वात् घटादिस्मृतिहेतुसंस्कारस्य न घ
टादिस्मृत्या नाश इति अदोषात्. विशिष्टवैशिष्ट्यस्मृतिश्च विशेषणतावच्छेदकप्रकारकस्मृतिसाध्या विशि
ष्टजन्यप्रत्यक्षत्वं च वा विशेषणाज्ञानादिकं हेतुर्जन्यप्रत्यक्षत्वस्य जातित्वात्. संशयकाले निरुक्तानुमिति — राम
स्त्विष्यते. भावनायाः उद्बोधकस्य च विशिष्टवैशिष्ट्यावगाहकस्मृतिहेतुमावश्यकं. अन्यथा दर्शरक्त इ — ६३

६०

तु हुद्भावनातो दंडो रक्त इति निश्चयकालानुरक्तदंडवानिति नतु वुद्धभावनातस्तु रक्तदंडवानिति जिस्मृतिप्रसंगा
त्। उपेक्षान्यसंशयान्यज्ञानत्वेन च स्मृतिहेतुत्वं: अवच्छेदकतया व्यासज्यवृत्तित्वात् नानाकार्यकारणाभावस्त
दा भावनायाः सविषयकत्वे किं मानमिति चेत् समूहालंबनादितो नानासंस्कारतत्तिष्ठनानावैजात्यकल्पनातो
भावनायाः सविषयकत्वे लाघवात् ज्ञानादिगतविषयिताया एव तत्कल्पनात् कालिकावच्छिन्नत्वरूपसंब
धेन विशिष्टवैशिष्ट्यज्ञानविषयितानि तज्ज्ञानव्याप्तत्वे नैव वासाजन्यतावच्छेदिकाः यत्र च विशिष्टवैशिष्ट्य छ्या शेसं
स्कारे द्वोधकयोरैकत्वेनैव वृत्तित्वं। संख्याद्ववयवपरिमाणानामेव परिणामसमवायिकारणत्वं। संयोगविभाग
शब्दानामेव शब्दासमवायिहेतुत्वं। स्पर्शगुरुत्वद्रवत्ववेगानामेवाभिघातहेतुत्वं। एकत्वैकपृथक्त्वसंयोगवि
भागानामेवानेकाश्रितगुणारंभकत्वं। परत्वापरत्वयोर्दिक्कालपिंडसंयोगजत्वं। परत्वापरत्वचरमज्ञा
नद्वित्वद्विपृथक्त्वादीनामेव निमित्तनाशनाश्यत्वं। एतदन्येषामेव गुणानामविनाश्यत्वं: कार्यगुणानामेवाश्र
यनाशनाश्यत्वम्। पार्थिवपरमाणुरूपरसस्पर्शसांसिद्धिकद्रवत्वस्नेहगुरुत्वच्छितित्वाप्यकनित्य[illegible]इ
ई। ज्ञानात्मातिप्रसंगः तत्रस्थलविशेषे संस्कारादेः पृथगहेतुत्वे लाघवमपीति दिक्।। रूपद्रवत्वयोः पृथिव्यतेजोमाइ

प.मा.
६४
64

इतरेभ्यो भिद्यते पृथिवीत्वात् यन्नेतरेभ्यो भिद्यते तन्न पृथिवीत्वाभाववत् इतरभेदाभावव्यापकपृथिवी

व्येकत्वैकपृथक्त्वपरिमाणोत्तरबुद्धीच्छाप्रयत्नानां नित्यैकार्यत्वे इतरेषां गुणानामनित्यत्वकार्यत्वे उत्क्षेपणादीनां सर्वेषा
मेकद्रव्यवृत्तित्वं सजातीयविरोधित्वं व्याप्यवृत्तित्वं मूर्त्तवृत्तित्वं अणुत्वं गुरुत्वं द्रवत्वं संस्कारप्रयत्नादृष्टसंयोगजत्वं स्वका
र्यसंयोगनाश्यत्वं वेगारम्भे नोदनादिसापेक्षत्वं असमवायिकारणत्वं हिष्टकार्यहेतुत्वं सजातीयानारम्भकत्वं द्रव्याना
रंभकत्वं आशुविनाशित्वं च। सामान्यानां द्रव्यगुणकर्ममात्रवृत्तित्वं विशेषाणां नित्यद्रव्यमात्रवृत्तित्वं समवायस्य
द्रव्यगुणकर्ममात्रानुयोगकत्वं अभावानां प्रतियोगिनिरूपणाधीननिरूपणत्वं इत्यादिकमूह्यम्॥ अ
थ द्रव्याणि विशिष्य निरूप्यन्ते। तत्र पृथिवीत्वस्यानुगतप्रत्यक्षादेव सिद्धिः। तावतापि परमाणावादिसाधारण्यादि
सिद्धिरिचेन्न। घटादौ प्रत्यक्षसिद्धेन पृथिवीत्वेनैव गन्धनीलादिसमवायिकारणत्वात् परमाणावपि तत्सिद्धेरिति प्रा
चः। नव्यास्तु। पाकजपाकस्यापाकजे च सुरभ्यसुरभिनीलतमादावयगतसुरभ्यादेर्नियामकत्वावश्यकत्वा
दतिप्रसंगाभावे पृथिवीत्वेन न गन्धादिसमवायिकारणत्वं। किंतु समवायेन जन्यत्वादौ द्रव्यत्वेन प्रतीता ह्यजन्ये
न तावतैव स्वसमवायिसमवेतत्वेन तावयवगन्धादिमत्त्वावयवरूपादौ गन्धादिविरहोपपत्तेः॥ अथ गन्धादिजनकवि

व३ न५

४ द्रव्यत्वेनेदं तुल्यत्वात्।

६४

जातीयतेजःसंयोगस्य तेजस्यपि सत्वात्तत्र पाकजगंधस्यापत्तिः तेजःप्रतियोगिकत्वविशिष्टविजातीयसं
योगत्वेन हेतुत्वे हेतुविशेष्यविशेषणाभावे विनिगमकाभावाद्गुरुरूपाभ्यां कारणत्वमपेक्ष्य पृथिवीत्वविजा
तीयसंयोगत्वाभ्यां तत्त्वे एव लाघवमुत्पन्नेः। न च पाकजजनकविजातीयतेजःप्रतियोगिकसंयोगसमवायि
कारणतानवच्छेदकतया पृथिवीत्वसिद्धिरन्यथा तत्र तेजःक्रियया जलादौ तेजोऽन्तरेच तादृशसंयोगजन
नापत्तेरिति वाच्यं। तन्न क्रियातत्तदुत्तरदेशरूपविशेषसामग्रीसहकृतसामान्यसामग्रीत एव विजाती
यसंयोगस्योत्पत्तेरनतिप्रसंगात्। अन्यथा तेजः क्रियया तूलके विजातीयःसंयोगो न पाषाणेऽत्र कुचित्री
लजनकःसंयोगः क्वचित्पीतजनक इत्यत्र नियामकानुपपत्तेरित्याहुः परे तु। चित्ररूपस्वीकारिवैशेषि
कनये पाकादवयविनि रूपादेर्नाशमात्रं उत्पत्तिं कारणगुणादेरिति न्यायनये च नीलादिकं प्रति नीला
भावादेः स्वाश्रयसमवेतत्वेनाभाव एव नियामक इति गगनमनोवायुपरमाण्वादौ नीलापत्तिवारणा
य पृथिवीत्वेन नीलहेतुत्वं वाच्यं। न चैवं पार्थिवपरमाणौ पीतरूपाद्युत्पत्तिकाले नीलापत्तिः। नील

घवमिति वाच्यं। गंधप्रागभावस्य विजातीयसंयोगसंबंधेन तेजसो वा कारणत्वात्तत्र गंधा ८

६५ तररूपनियतत्तेजःसंयोगाभावस्य सर्पिरादिहेतुत्वात् । न चैवं गौरत्वं पाकावयवनीलहेतुत्वस्य तज्जन्यतावच्छेदकजातेश्चा
कल्पनेन लाघवात् । एवं सौरभादीतरगंधे सौरभादेरेव विरोधित्वात् तद्धेतुतावच्छेदकतया न तत्सिद्धिः । अत एवमपादा
65 वपि गंधः । अस्तु वा विजातीयगंधे घ्राणग्राह्यपरमाणुमात्रभागपादिप्रयोजकत्वमस्तु का हानिः । न चैवं तन्मतेऽपि त्रसरेण्वादौ गंधाप
त्तिः । निर्गंधसमवेतत्वाभावस्य गंधत्वावच्छिन्ने हेतुत्वात् । अस्तु वा सौरभादौ सौरभाभावादेरेव विरोधित्वे सामान्यतः
कल्पनाच्च न विजातीयगंधः । एवं च घ्राणग्राह्यगंधे नीलादिरूपस्य त्वगंधे नीलादिरूपपरमाणावारंभकत्वात् । तेन गंधवन्नी
लादिरूपस्य परमाणोरिति चेत् । फलवलात्तज्जातिविधकल्पने तेजःसंयोगकल्पनात् । अपि च जलक्रियाव्यंजनरसादि
कार्यत्वेऽपि च जात्या तेजःसंयोगस्य हेतुत्वात् जले रसविशेषादिवारणाय पृथिवीत्वेन तद्धेतुत्वसिद्धिः । न च मधुरादि
नानारसप्रत्येकपाते तेजःसंयोगस्य हेतुत्वेऽतिप्रसंगः । रसविशेषे द्रव्यविशेषस्यापि नियामकत्वात् । तदेवं वैकल्पे
ववह्निनाम्रफलपक्वान्नानाविधरसवत्त्वं । न चैवं जलाद्यविशेषाभावादेर न रसविशेषः जलादिपरमाणुकृतवि
शेषस्य जलादावपि सत्त्वात् । एवं नीलपीतादिनानारूपहेतुत्वमप्येकस्यापि । रूपविशेषे द्रव्यविशेषस्तत्रापि
परमाणोर्जातिकृतविशेषाभावेऽपि द्व्यणुकान्तरयोगकृतो विशेषः । तत्रापि मिष्टत्वादेः पाकाद्युपरसप्रकारतम्यजलादि राम ६५

हीरु

योगात्। अत एव बहुरूपा का जलादौ न मेदाह। द्रुतादौ दीप्ति को ऽपि रस इत्याहुः॥ वस्तुतो नीरे नीलाभावादेव नीलत्वाद्य
वच्छिन्नविरोधित्वं। न्यायनये युगपदेवावयवावयविनोः पाकात् नीलादुक्तलक्षिः। न च पाकजन्यनीलत्वाद्यवच्छिन्नेन सम
विरोधित्वं जन्यपृथिवीत्वेन च हेतुत्वमिति वाच्यं। जन्यपृथिवीत्वपृथिवीत्वयोः कल्पनातः क्रमेण नीलत्वादिना हेतु
त्वस्यैव युक्तत्वात्। न च नीलेतररूपादेर्नीलत्वाद्यवच्छिन्नं प्रति विरोधित्वं अनुकूलरूपास्वेव घ्राणादौ नीलाद्याप
त्तेः। किं च द्रव्यविशेषस्य संयोगविशेषापत्तौ गगनयोजलक्षिणजनकतावच्छेदकव्याप्यजातेरेवं मधुरादिरसहेतुत्वा
त्। तत्र जले रसाद्यापत्तिरस्तु स्मान्न तु सिद्ध्यारम्भकसंयोगवज्जलादौ गन्धादिजनकसंयोगस्यापि सम्भवादेवं पृथिवीत्व
सिद्धिरिति दिक्॥ सा च रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वगुरुत्व
संस्कारात्मकचतुर्दशगुणवती। द्रवत्वोक्ता अत एव सिद्धा। न च घृताद्यात्मकपृथिव्यां क्षीरादाविव जलद्रवत्व
मेव प्रत्यक्षं स्यादिति वाच्यं। तेजःसंयोगान्वयव्यतिरेकानुविधायि द्रवत्वस्य जलेऽनुपपत्तेः॥ गुरुत्वपत न
नानुमेयम्। आद्यपतनासमवायिकारणस्य छेदेन समवायगुरुत्वप्रत्यक्षमिति वल्लभाचार्याः॥ अयं च धूमो न जले स्नेहाद्यभावा
त् नीलादिमत्त्वाच्चात एव न तेजः परामर्शकाशकत्वाच्च। किन्तु पृथिवी तत्र च गुरुत्वं नास्त्ययथोर्ध्वगमनसमवादिमि

चेत्तः। अलं भ्रमतादृशायां गुरुत्वे पतनं भेनन त्र्युरुत्वावश्यकत्वात्। अथ द्वितीयगतिस्तु वायुनोदनात्स्वलोटे विवेचितेति दिक्। सं
९९ स्कारो वेगस्थितिस्थापकौ। तत्राद्यो वेगो न च लतीत्यादि प्रसिद्धः। स्थितिस्थापकस्तु शारवादौ तेन मनोऽन्तरं त्यागो
यथास्थाननियतसंयोगजनककर्मजनकतयास्ति द्वः। न हि नोदनाभिघातवेगगुरुत्वद्रवत्वप्रयत्नान्यतमं पत्रस्य कर्म गो
66 निपतदेशसंयोगजनकत्वं संभवति। मीमांसकास्तु। निरन्तरगतिसंतान एव वेग इति तत्र प्रथमेषुक्रियाया स्वजन्यो
त्तरसंयोगात्रिनष्टत्वादुत्तरक्रियायां वेगविभागानुपपत्तेः। न च प्राथमिकोत्कृष्टक्रियैव क्रियान्तरजनिका नोदनाद
नां गुरुणामिव गुरुत्वस्यापि कज्ञान्या क्रियात्वावच्छिन्नजनकत्वात्। कुर्मवतिकर्मानुत्पत्तेः संभवाच्च। न चोत्कृष्ट
यां तस्यामेव विरोधितागौरवात्। न चास्त्वेकैवोत्कृष्टक्रियातु। वत्संयोगजनिका चरमसंयोगस्यैव नाशकत्वादि
ति वाच्यम्। आशक्तावच्छेदके चरमत्वनिवेशे गौरवात्। न च वेगान्न क्रिया क्रियातो वेग इति वेगाविरामे इष्वादि
पातो न स्यादिति वाच्यम्। उत्तरोत्तरवेगक्रियापकर्षस्यात्यन्तापकृष्टक्रियात्तावेगाजनकत्वेन तत्तत्संभवादिति।
तथा च परमर्षिसूत्रं। नोदनादाद्यमिषोः कर्म तत्कर्मकारिताच्च संस्कारादुत्तरं तथोत्तरमुत्तरं चेति। इदं तु बोध्यम्। स्व राम
जन्यक्रियाजन्यसंयोगस्यापि विनाशकत्वे प्राथमिकवेगद्वितीयकर्मणोर्युगपदेव नाशान्न हि तीयो वेगः कु ९९

तः वेगवन्निवेगानुत्पत्तेः प्राक्तनदसंभवात् (स्वजन्य)॥ कर्मणो वेगनाशकत्वे तु वेगः स्पर्शवद्द्रव्यसंयोगविरोधीति
भाष्यविरोधः॥ किंच कर्ममात्रं न वेगजनकं मंदकर्मणोऽपि वेगापत्तेः॥ किंतु नोदनाभिघाताद्यपेक्षं इत्यपि भाष्यं। इत्थं
चाद्वितीयादिकर्मणः कथं वेगस्तस्मादेकस्मादृष्टा सुखध्मरेव नोदनासापेक्षाद्येषु कर्मजादेकस्मादेव वेगा
दुत्तरोत्तरकर्मसंतानः॥ इत्थमिव स्पर्शवत्संयोगविरोधीति भाष्ये च रमसंयोगोपलक्षकं स्पर्शवत्परमपि युक्तं इ
तिमते यथा वेगस्य प्रकर्षात्तु सारेणाफलवाद्रुत्पकल्पनान तथा क्रियाया अप्यस्त्विति किं वेगाख्यगुणोन पि हि व
वेगतारतम्यप्रत्ययात्तान्नावेगापत्तेः स्वजन्यकर्मणो वेगनाशकत्वाद्द्वितीयवेगानुपपत्तिस्तदा वेगस्त्वसि
द्धतीत्यन्ये॥ वेगस्य क्रियायां तन्नाशकत्वजनकत्वयोश्च कल्पनातः प्रकृष्टक्रियायाश्च प्रकृष्टक्रियाहेतुत्वमे
व युक्तमित्यपरे॥ स्थितिस्थापके च मानाभावः त्रवयवानां परस्परसंग्राहककर्मसंयोगवशादेव स्थानस्थितेः॥ नहि
तत्स्थानावच्छिन्नसंस्कारस्तत्स्थानसंयोगानुकूलक्रियाजनक इति नियमः संभवति। तन्मनवशात्त्कृष्टसंग्राहक
संयोगवत्त्वात्त्रपि शाखायाः प्राक्तनस्थाननिस्थत्वापत्तेरिति दिक्। तथासिताववगंधः॥ रूपमनेकं कृष्णादि शु
क्लादि। रसः षड्विधो मधुरादिः। स्पर्शोद्विस्त्राधुष्णमात्राशीतत्वेसमानवाचकजगन्नात्रमात्राशीनत्वजातिविशेषाव्य

थिवीवायुस्माधस्ताइतिषांचतः यत्तुष्टिव्यांमर्त्यैः गतितउक्ष्मशीतेतरस्पर्शानुभवादितिमत्रामाहशस्पकठि
नादिस्पर्शस्यानुभःवातनत्रोस्मत्वाघवमासत्वोपार्थिकःअनिविशेदेमानतमावः पूर्त्तंपत्रैडा मं

६१

[redacted]॥ स्पर्शोस्यात्अनुष्णाशीतत्वे सति पाकजः अनुष्णाशीतत्वं जातिविशेषः पृथिवीवायुस्पर्शसाधारणा इति
ध्येचः। यत्तु पृथिव्यां स्पर्शो नास्त्युष्णशीतेतरस्पर्शानुभवादिति तन्न। तादृशस्य कठिनादिस्पर्शस्यानुभवात् तत्रोष्ण
त्वाद्यवभासस्त्वौपाधिकः। जातिविशेषे मानाभावः। उष्णशीतेतरस्पर्शत्वे नैव तद्व्यवहारादित्येके। नैतद्युक्तं। उष्णशीत
प्रतिसंधानेप्यनुष्णाशीतत्वावच्छिन्नप्रत्ययादित्यपरे। उभयथाप्यनुष्णाशीतस्पर्शवत्त्वं वाय्वोरपीति पाकजत्वमुक्तं। त
था च पाकजत्वे अनुष्णाशीतत्वव्याप्यजातिमत्स्पर्शवत्त्वं लक्षणं न च पृथिव्यां रूपादिकमक्षपाकजं सुकनीलादिस्फु
टविशेषात्स्पर्शस्तु न तथेति वाच्यं कठिनादि इमे पाकेन सुकुमारादिस्पर्शदर्शनात् दृश्यते हि काष्ठमृदाद्यारंभक
रम्भतांमृत्पाषाणाद्यारंभकत्वं स्पर्शविशेषसहकारात् दृष्टेन पार्थिवपरमाणौ सर्वेषु कार्यद्रव्यरूपादिजातीयं रू
पादिकं नित्यं पाकाच्चद्व्यणुकाद्यंत्यावयविपर्यंते एवं रूपादिनाशे परस्परहे त्व पा [redacted]
कावयवरूपादिभ्यां यद्व्यणुके चित्रं एवं रूपादिजातीयमेव वा न त्वोत्पाद्य क
पाकानंगीकारादवयवरूपादिजन्यमेव वा रूपादिजा यतेतदा त्र्यणुकादौ पररूपादिकं पाकादेव जायते इत्यप
रमपरमाणौ रूपादिविशेषाभावे तत्र त्र्यणुकाद्युत्पत्ति नियमानुपपत्तेः। द्व्यणुकत्र्यणुकादेः क्रमेणोत्पत्त्या

68

गपत्पाकेननवरूपोत्पत्तेरसंभवाच्च। किंचश्यामपरमाणवारब्धेषुद्व्यणुकेषुश्याममेवत्र्यणुकादावेवरक्तमित्यत्रको
यत्रकिं। विद्व्यणुकावच्छेदेनपुनःश्यामजनकतेजःसंयोगात्र्यणुकेचित्रंजायतेनत्वत्रापिश्याममेवस्यादितिनकिं
विदेतत्। आचार्योक्तं। स्पर्शस्यापाकजत्वेसंख्यापरिमाणादिवद्विशेषप्रसंगः। तथाचाहुः। वृश्चिकदंशेशूकशि
विन्दु। वृश्चिकपत्रिकादिस्पर्शेचदुःखविशेषेणस्पार्शस्यावगमात्महौषधिस्पर्शेनतदुपशमः गवादिचंडालादिस्प
र्शेविधिनिषेधौचनस्युस्तौ। नचद्रव्यमात्रेतौदर्शनस्पर्शनघ्राणास्वादनभेदेनमातंगमदिरादिषुप्रायश्चित्तभेदा
भावापत्तेरित्याहुस्तत्र। तत्रस्पर्शविशेषग्रहस्यतत्रतत्कार्यहेतुत्वेसुघु दोतत्रस्यात्। तत्रस्पर्शवत्संयोग त्या
स्यतत्त्वेतुतत्तत्संयोगस्यैवतत्त्वंस्पर्शविशेषस्यतुबाधितोयोगोपगतजातेर्योगपत्वनियमादेतेनसंयोगमात्रस्यात
त्वेघ्राणेपिस्पर्शप्रायश्चित्तंस्यादित्यपास्तमितिदिक्। नचैतावतागंधवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वंसुरभीतर
रूपसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वमित्यादिलक्षणंप्राप्नामचैतद्युक्तं। सुगंधिसलिलंसुरभिःसमी राम
रणः कालिंदीजलंनीलमित्यादिप्रतीत्याजलादावपिगंधादिसिद्धेरितिचेन्न। सलिलादौगंधादिमत्संयोगोपाध्य
न्वयव्यतिरेकप्रयुक्तान्वयव्यतिरेकप्रतियोगित्वेनौपाधिकत्वात्प्रतीयते। हिचंदनसंयुक्तेजलेचंदनगंधः। कुं ६८

मानाभावः जलपाकाद्गंधरसविशेषो भवत्येव स्यात्ः तस्मिंस्तं यत्नतु गंधवत्त्वादिकमेव पक्षलक्षणमिति तत्रः

कुंकुमसंयुक्ते कुंकुमगंधवदिति। किंचोक्तयुक्त्या गंधत्वाद्यवच्छिन्ने पृथिवीत्वादिना हेतुत्वात्र जलादौ तत्संभवः॥ न चाकज
लत्वादिनैव गंधादिहेतुत्वं अनतुभूयमानजलादिसंबंधकेपि गंधादिप्रत्ययात्। अन्याहृशगंधस्यवक्तुतः पाके
नान्याहृशगंधवत्त्वाज्जलादौ पाकजगंधवत्त्वानुपपत्तेश्च। एतेन नीलरूपमपि व्याख्यातं। वियति विक्षिप्ते कालि
दीजलेपि शुक्लत्वस्य प्रतीतेर्बाधकं विना यथार्थत्वात्। जन्यत्वस्य च सुकृत्त्वावच्छेदे न जलजन्यत्वकल्पना च। एकदेशि
नस्तु कारणगुणत्वसमवायिकारणतावच्छेदकतात्वैव गंधादिसमवायिहेतुत्वं पृथिवीमात्रवृत्तिजातौ पृथुमरकतपादौ
गंधाद्यभावेनाव्याप्तिः॥ न च मरकतपारंभकानीलारंभकपरमाणावेव गंधवत्त्वं तः पाकजरूपवत्त्वादित्यनुमानात्तै
षु गंधसिद्धौ द्व्यणुकाद्यन्त्यावयविष्वपि गंधजगंधसिद्धिः॥ जलादिकं गंधवद्रूपवत्त्वादित्यनुमानाज्जलादावपि तत्सि
द्ध्यापत्तेः॥ अप्रयोजकत्वान्नात्सिद्धिरिति चेत्तुल्यं। न च पाकजरूपगंधयोरेकसामग्रीकत्वान्नाप्रयोजकत्वमिति
वाच्यं। रूपपरावृत्तावपि गंधस्यापरावृत्तेः॥ नीलपीतादिषु रम्यसुरभ्यादिनियमानुपपत्तेश्च विजातीयविजाती
यतेजःसंयोगत्वेनैव रूपगंधहेतुत्वेन सामग्रीभेदात्। इत्थं च पाकविशेषात्तत्र गंधैरणुभिर्मरकतपारंभान्निर्गंधता
मरकतपादेः॥ गंधवद्विशरंभोत्रइस्मनो गंधवत्त्वमिति नातद्भूतगंधसिद्धिः॥ एतेन घ्राणांगंधवत्पृथिवीत्वादि

69

त्वादिकमप्युपपन्नं। आकाशे रूपवद्द्रव्यत्वादित्यादेराकाशादावप्यनुद्भूतरूपापत्तेः। यत्तु रसनादौ योग्यजलाद्यारंभप्र
योजकपरमाणवारब्धे रूपादिकमावश्यकं। न हि तत्रापि परमाणौ योग्यताकेन रूपादिध्वंसे संभवति। तेन चेत्र रसनादावुद्भू
तरूपादिप्रसंगात्। अदृष्टविशेषो रसनादिभेदस्तत्तन्समवायिकारणमेव वोद्भूतरूपादिप्रयोजकमिति चेन्न हि
रूपादिप्रयोजकमेवास्तु। यत्तु जलत्वत्वावच्छिन्नं प्रति स्वच्छत्वेन हेतुत्वात्तत्रोद्भूतत्वं जन्यतावच्छेदकं। नाप्यनुद्भूतत्वं द्र
व्यत्वावच्छिन्नप्रतिबंधकतावच्छेदकतया सिद्धस्य तस्य परमाणुरूपनिष्ठतया नित्यवृत्तित्वात्। इष्टं च द्रव्यत्वावच्छेषे महत्वा
हेतुत्वेनापि लाघवमिति तन्न। महत्वरूपयोश्चाक्षुषहेतुत्वेनोपपन्नत्वान्नानुद्भूतरूपत्वप्रतिबंधकत्वकल्पना
याश्च न्याय्यत्वात्। जन्यस्वच्छत्वव्यञ्जकस्यानुद्भूतत्वस्य जन्यतावच्छेदकत्वावश्यकत्वात्। रसनाद्यारंभकाः परमाण
वो भिन्नास्वेतस्याः कुतः। वस्तुतस्तु जलादिपरमाणवः सरूपनिरूपभेदाद्द्विविधाः। तथा च रसनादिद्व्यणुकं नीरू
पमात्रारब्धं। योग्यजलादिद्व्यणुकं तु नीरूपसरूपाभ्यामित्यनियतारंभः। एकस्य रूपादेरनारंभकत्वेन योग्यद्व्यणुकं प्र
स्तु वा योग्यजलादिद्व्यणुकं सरूपद्व्यणुकद्वयनीरूपैकद्व्यणुकारब्धमित्यदोषः। वायौ रूपं नास्तीति लौकिकप्रती राम
तिरप्यनुद्भूतरूपासत्त्वसाधिका। न तस्य योग्यानुपलब्धिभावेन तल्लौकिकप्रत्यक्षायोगादिति कः। एवं स्युक्तेन रस्युक्ते ६९

मादिसमानाधिकरणाद्व्यत्वव्याप्यजातिमत्त्वमपि पृथिव्यामेव जलतेजसोः शुक्लेषु वा न रूपान्तरस्याभावात् पार्थिवद्र
व्यस्य सर्गेरीव तथाप्रतिभासाद् एवमवान्तरानेकसामान्यविशेषवान् रसः पृथिव्यामेव जलस्य तु स्वभावतोऽव्यक्तमधुर ए
व रसः । नारिकेलादिजलरसगतविशेषाणां सांसर्गिकपार्थिवोपाधिकत्वात् ॥ सा च पृथिवी द्विविधा । नित्यानि
त्या च । नित्या परमाणुलक्षणा । कार्यलक्षणा त्वनित्या । (अथ परमाणौ मानाभावः ॥ न च स्थूलद्रव्यस्य लोष्टादेर्भज्य
मानस्याल्पतरतमादिभावात् यतो नाल्पीयः स परमाणुरिति वाच्यं तत्रिस्तत्वे मानाभावस्य शंकितत्वादिति चेन्न । नि
खिलद्रव्यावयवानां सावयवत्वेन वस्त्वाद्यसंगात् प्रलये नान्तरावच्छेदेनासंभवात् । मेरुसर्षपादीनामनन्तावयवकत्वा
विशेषात् परिमाणतारतम्यानुपपत्तेश्च । न च प्रचयाद्विशेषः । तूलपिंडे मेरौ च तद्विशेषतादवस्थ्यात् । तूलपिंडे प्र
चयस्यापि सत्त्वादिति कस्य चित् निरवयवत्वं वाच्यं । निरवयवस्य च द्रव्यस्याकार्यत्वेन नित्यत्वं । न चैवमेवास्तु नि
त्यः परमाणुः द्व्यणुके त्वमानाभाव इति चेत् त्र्यणुकस्य हि लौकिकप्रत्यक्षविषयतया महद्द्रव्यस्य अवयवे महत्त्वं वाच्यं । न
च महत्त्वप्रचयाजन्यं अवयवबहुत्वसंख्याजन्यमिति परमाणुद्वयेऽसमते वं न त्र्यणुकं किंतु द्व्यणुकं तदारब्धे त्र्यणु
कमिति सिद्धं । न च परमाणोर्महत्त्वाभावेऽपि प्रचयः संभवतीति तज्जन्यमेवास्तु तन्महत्त्वं किंचिदवयवकाछेदेन संयोगि

अ३

त्वे सति संयोगित्वलक्षणोऽवयवस्य निरवयवे परमाणावयोगात् । तदयं प्रयोगः अणुकावयवाः सावयवा महदारंभकत्वात्कपाल
७० वत् । अणुकावयवावयवाः निरवयवाः सावयवत्वे मानाभावादिति ॥ ननु चते सावयवाः स्पर्शवत्वादिति मतप्रतिपन्नः अ
70 नवस्थालक्षणाप्रतिकूलतर्कपराहतत्वात् । न च त्रिभिः परमाणुभिरेव त्र्यणुकमारभ्यताम लं द्व्यणुकेनेति वाच्यं तत्
यापि परमाणुद्वयारब्धस्य द्व्यणुकत्वानपायात् । यत्किंचन समयुक्ते त्र्यणुकोत्पत्तिकाले द्व्यणुकोत्पत्त्यापत्तेः । तस्मा
द्व्यणुकं प्रतिपरमाणुत्वेन त्र्यणुकं प्रति द्व्यणुकत्वेन समवायिकारणत्वं वाच्यम् । न च परमाणुत्रयादावपि द्व्यणुकाप
त्तिः अदृष्टविशेषस्य योऽन्यस्यातीन्द्रियस्य विजातीयसंयोगस्य युगपत्त्रिषु परमाणुष्वस्वीकारादिति तन्न । द्व्यणुकस्य कार्य
तानवच्छेदकत्वेन त्र्यणुककालीनत्वापादनीयोगात् । त्रे त्र्यणुकत्वानुत्पत्तिस्त्र्यणुकपरिमाणासामान्यापत्तिर्वा तत् । द्वि
त्वस्य व्याप्यत्वसंबंधेन जन्याणुत्वे हेतुत्वात् । तत्र द्व्यणुकात्मकसमवायिविरहात् । इति । अथैवं कपालत्वतंतुत्वादि
ना घटपटादिहेतुत्वे मानाभावः । उक्तं चैतत्तत्त्वचिन्तामण्यादौ । इति तंतुकपटादेरपि तंतंतरसंयोगोत्पटाद्युत्पादक
त्वादेकैकतंतुसंयोगे द्वितंतुकादेर्नाशे त्रितंतुकाद्युत्पत्तिः ॥ पुनरेकैकतंतुवियोगे त्रितंतुकादिनाशे द्वितंतुकाद्युत्प
त्तिरिति कल्पनायां गौरवप्रसंगादिति चेन्न । द्वितंतुकादौ अन्वयासिद्धान्वयव्यतिरेकानुविधानान्तथात्वे राम ७०

न्तुत्वसिद्धेश्चितंतुकपटादेरपितंतावेवोत्पत्तिः युगपन्नंतु त्र्यादिसंयोगे [illegible]चितंतुकादेरपितत्रैवोत्पत्तेर्गौरवत्वाद्धि तंतुका
दिक्रमेणोत्पन्नचतुरादितंतुकपटस्य द्वितंतुकासमवायिकारणसंयोगनाशान्नहि तंतुकादिनाशक्रमेणानाशेंऽतरा
सुनहि तंतुकादिक्रमेणोत्पत्तिरिति तत्वापिकल्पनागौरवसाम्यं ततो एव पटइतिप्रतीतेर्भ्रमत्वायोगाच्चानहि पटे पट
इतिकश्चित्स्वतेजित्यतएवतंत्वाकाशादिसंयोगत्वेनपटाकाशादिविजातीयसंयोगत्वेनत्वादिकार्यकारणभावे
पित्त्वपपदः पटादिजनकविजातीयसंयोगषति तंतुत्वादिनाहेतुत्वात्तत्वादावेवपटाद्युत्पत्तिरित्य[illegible]प्यादुः एतेन
तंतुभ्यांतदारब्धद्वितंतुकपटेनचतंत्वंतरसंयोगात्त्रितंतुकोत्पत्तिः एवंचतुस्त्रितंतुकादेरपीत्यारम्भारंभकवादएव
सुकरस्सम्प्पा[illegible]स्तोनन्वेवमपिद्वितंतुकपटादिमतोरेवतंत्वाद्योस्तत्वंतरादियोगात्त्रितंतुकपटाद्युत्पत्तिर[illegible]स्त्वा
नचद्रव्यवतिद्रव्योत्पत्तिस्वीकारेऽसमत्राह्वितंतुकेस्यतत्रैवपुनरुत्पत्तिःस्यादितिवाच्यंतत्संयोगभावस्यनष्टत्वात्तयोःसं
योगांतराद्वावाद्वितं[illegible]तुकपटस्य तदातोत्पद्येतात्रसंयोगांतरस्य पूर्वपटध्वंससमवायहेतुत्वात् अन्यथाप्रथमंत
वापिकथंनायिमद्वितंतुकोत्पत्तिः एवंचदृश्यतंतुकादेश्चरमतंतुसंयोगवियोगक्रमेणनाशेनवतंतुकाद्युत्प
त्तिश्चिन्निरावाधा प्रथमतंतुसंयोगक्रमेण नाशस्तं तो वदशतंतुकनाशानंतरंनवतंतुकोत्पत्तिरस्त्वेवेद
तं

प.मा. ७२ शतंतुकोत्पत्तिकाल एव दशमतंतुपर्यंते द्वितीयादितंतुमादाय नवमंतंतुकाद्युत्पत्तिः। न चैवं तत्र प्रतिलोमक्रमेणानेकप
टकल्पनापत्तिः द्वितीयमादाय नवतंतुकस्यैव तृतीयमादायाष्टतंतुकस्यापि स्वीकर्तव्यत्वादिति वाच्यं यस्त्वयायेस्वी
क्रियते तेन स्यैव मया प्रथमतः स्वीकारात्। नवतंतुकादौ दशतंतुकादिध्वंसस्य हेतुत्वे मानाभावात्। अन्यत्र प्रागभावाभा
१५ वेनैव तद्विरहोपपत्तेः। अथ व्यक्तिस्थानीयापत्तिविरहाद्द्रव्यत्वावच्छिन्नाभावस्य कारणत्वेनानतिप्रसंगे किमनेनतका
र्यकारणभावकल्पनेनेति चेन्न। दशाद्यवच्छेदे न तत्त्वेन पटादिमत्यपि तदुत्पत्त्यापत्तेः। दीर्घतंत्वादौ वस्त्रयुग्मा
द्यनुत्पत्त्यापत्तेश्च। अस्तु वा द्रव्यत्वावच्छिन्नाभावस्य जन्यद्रव्यत्वावच्छिन्ने हेतुत्वे कर्मणः संयोगवत् तथापि द्वितंतुका
दिमति त्रितंतुकाद्युत्पत्तिर्निराबाधा युक्तं चैतत्। अन्यथा द्वितंतुकपटादिमति तंत्वंतराद्संयोगादेकतंतुकपटोत्प
त्तेर्दुर्वारतापत्तेः। अत्रोच्यते एकः पटद्वयादिप्रतीते लौकिकस्यात्मादौ तथा व्यवहाराच्च पटस्यैक्यसिद्धिः। न हि नानाप
टाः प्रतीयंते व्यवह्रियंते वेति। अंगुलीभूतलसंयोगावच्छेदेन पाण्याद्यनंतसंयोगानुपल[illegible]ब्ध्यादिवद्विप्रतीतिवे राम
त्वात्। तत्र युक्त्या न त्रानात्वे तदनुपलब्ध्यादेः कर्मजसंयोगद्वित्वत्रित्वादेर्वामाद्यनंतसंयोगादेश्च कल्पनामपेक्ष ७२
तेषां नाशस्यापि क्वचिदन्येषां कल्पनेऽस्यैव लाघवेनौचित्यात्। समवायेन जन्यद्रव्यं प्रति वद्धत्वे लाघवाच्च। देशा स्याद्व्य
२ सा दृश्यादिवत्तानुपपत्तेः। न चात्रापि तथा महापटकाले द्वितंतुकादेः स्वीकारे तत्ताकात्रादिसंयोगाद्वितोऽनंत
२ द्वितंतुकाकाशसंयोगादे द्वितंतुकत्रितंतुकादेः ५२

नवच्छिन्नविशेषणानयात्तदभावस्य कारणत्वाद दोषः। वस्त्रकुम्भादिव्यवहारस्तु भाविपटपरतयोपपाद्यः॥ एकतंतु
कादिविरहस्तु निर्द्रव्यद्रव्यस्य विजातीयसंयोगासंबंधेन जन्यद्रव्ये हेतुत्वात्। एतेन एकस्यैव तंतोः कुटिलभावाद्यः
पटो जायते तदसमवायिकारणं न तंतुसंयोगः। तत्तंतोः स्वस्मिन्नवयवे वा संयोगासंभवात्। किंतु तंतोरवयवा
नामंशूनां संयोगा इति तन्न तुशालिषु अंशुष्वेव स पटो जायते। एकतंतुकव्यवहारस्त्वेकतंतोरवयवैरेव जातत्वात्। अ
स्कवाशिरसि शरीरसंयुक्तः यातिरिति प्रत्यया। इन्द्रावयवावच्छेदेनावयविसंयोगो प्यवयवे न तथा चांशुतंतुसंयो
गएव तत्पटस्यासमवायी। समवायी तु तंतुरेव परिमाणप्रकर्षस्त्वसमवायिसंयोगाश्रयबहुत्वादिति मतमपपा
स्तं। निर्द्रव्यद्रव्यसंयोगस्य तत्रासमवायिनो माधभिधानात्तु ऐव तत्पटोत्पत्तेः॥ अन्यथा तु पटसंस्थानसारूप्याद्भ्रांतए
व पटप्रत्ययइत्यलमप्रसक्तेन। अत्राचार्याः परमाणुभिरेव बहुत्वोपेतैर्महत्तद्व्यारंभेगो घटादिरप्यारभ्यतां। त
था चांतरालिकाल्पाल्पतरकार्योपलंभविरोधः अणुकद्व्यणुकाद घटादिरप्युपलब्धरेखोपरेखः स्यात्। इष्यं च
संस्थानभेदानुपपन्नोत त्रियत घटत्वादिरपि न स्यात्। अथ द्व्यणुकैर्महद्वारंभेपि समानो यमनुयोगः। द्व्यणुके
र्बहुत्वोपेतैस्त्र्यणुकमेवारभ्यते इति वेत् परमाणुभिरपि बहुत्वोपेतैर्द्व्यणुकमेवारभ्यते इत्यपि तुल्यं। अत्रा स्व

प मा

72

तेऽपि यावयवावयवविभागः परमाणुष्वेव विश्राम्यति। तथावयवसंख्यापकर्षो द्वित्वे विश्राम्यति। एकमात्रस्यारंभकसंयो
गाभावेनानारंभकत्वात्। तथा च द्वाभ्यां परमाणुभ्यामारब्धं द्व्यणुकं त्रिभिर्द्व्यणुकैस्त्र्यणुकं। द्व्यणुकाभ्यां तु नारंभः प्रयो
जनाभावात्। तदारब्धे महत्त्वायोगादित्याहुः। द्व्यणुकाभ्यामारब्धेपि द्विकपालकघटइव महत्त्वं संभवतीति त्वध्येय
मिदं तु चिंत्यं। परमाणुभ्यामारब्धेप्युक्तमहत्त्वं परिमाणत्वे नैव महत्त्वासमवायिकारणत्वौचित्यात्। अस्तु वा द्विक
पालकघटमहत्त्ववत्त्वद्वित्वमेव त्र्यणुकमहत्त्वस्यासमवायिकारणं। न च साक्षात्परंपरावयवगतबहुत्वमेव हेतुः। गौरवा
न्। अस्तु वा त्रिभिः परमाणुभिरेव त्र्यणुकं परमाणुभ्यामनारंभकस्सिद्धांतिनो द्व्यणुकाभ्यामनारंभइव त्र्यवांतर
परिमाणभेदकल्पने गौरवान्मानाभावाच्च लाघवेन त्र्याणामेव युगपद्विजातीयसंयोगकल्पनात्। वस्तुतो गवा
क्षरंध्रेदृश्यमानानां त्र्यणुकत्वमेव युक्तमणुत्वयाख्यत्वे लाघवादिति मीमांसकास्तत्। त्रुटावेव विश्रामात् त्रुटिमहत्
त्वं नित्यमिति मतन्निराकरणापरिचिंतने। न च गगनमहत्त्वावधिकापकर्षस्य बहुत्वजन्यतावच्छेदकत्वे कथं त्रिसत
त्रुटिमहत्त्वावधिकोत्कर्षेणासांकर्यापत्त्या तस्यानुगतस्याभावात्। त्रुटिमहत्त्वावधिकोत्कर्षस्य तज्जन्यतावच्छेद
कत्वात्। गगनमहत्त्वादेरपि जन्यत्वापत्ताच्चेत्याहुः। इदं धनादावपि वस्तुतस्त्र्यारंभकपरमाणुसंख्याकथनं यथास्वत्वा

राम

७२

वत्त्वं परमाणुमहतोर्यत्र जन्यत्वनियमादिति प्रत्युक्तं नावलंबीनं तत्र ... अतितस्त्वतैलादावित्यनुद्भूतरूपवद्...

वह्निसंयोगो ज्वलनश्चादौ महावह्न्यादेः कथं वा पाषाणेन्धनादिसंघर्षणाद्वह्न्युत्पादः॥ तथा च परमाणोरतीन्द्रियत्वमु
चितं योग्यानामुद्भूतस्पर्शभास्वररूपवत्तेजस्त्र्यणुकानां तत्रसत्त्वे महान्धकारे नैतेषां योगीधनानां नैषां च प्रत्यक्षत्वापत्ते
स्त्र्यणुकेन व्यंजकमिति रिक्तावयविनी। न चाणावोनयोग्याः घटादयस्तु योग्या इति विशेषः॥ इतरेतरयोग्यानामपि के
शादीनां सजातीयसंवलने योग्यत्ववदयोग्यत्वोपपत्तेरिति चेन्न। अणूनां स्वभावतोऽयोग्यानां सजातीयसंवलनेना
पि योग्यत्वासंभवात्। केशादीनां तु न स्वभावतो योग्यत्वं किंतु दूरत्वेनेति। न च परेषां सरणभंगवादिनामयोग्या
दपि परमाणोर्योग्यपरमाणोरुत्पत्तिस्तवद्व्यणुकाद्यणुकवदिति वाच्यं सरणभंगनिरासात्परमाणूनामनित्यत्वा
न्महदणु इतरत्र पवत्त्वे नैव द्व्यणुकस्यायोग्यत्वात्। अन्यथापि शाचादेरपि प्रत्यक्षतायातात्। न यथा च पाश्मर्षसूत्रं नो
नीन्द्रियत्वाद्द्व्यणूनामिति संप्रदायः॥ अत्र न व्यनास्ति काः॥ सत्त्वराणावो नित्यास्तथापि संयुक्तास्यादयं द्व्यणुकसंयु
क्तास्तथा त्र्यणुकसंयुक्ताणुचतुर्विंशतिकं चतुरणुकमित्याद्यस्तु। लौकिकविषयतया द्रव्यसाक्षात्कारस्त्वाव
च्छिन्नत्र्यणुकत्वादिघटकसंयोगानां पिशाचत्वादिघटकसंयोगभिन्नानां वजात्यनकारणत्वान्न केवलाणुद्व्यणु
कादेः प्रत्यक्षता। न वचैजात्यकल्पने गौरवं त्वयापि द्व्यारंभकतावच्छेदकत्वेनाभिमतस्य वैजात्यस्यैव मया द्व्यणु

[illegible]

प.भा

73

कपिशाद्याचारंभकत्वेन तत्तदभिमतसंयोगव्याहृत्तत्वस्वीकारात्। तदुद्भूतरूपत्वादिकल्पने गौरवाच्च।। न च विजाती
यसंयोगस्य द्रव्यत्वमेव जन्यतावच्छेदकं लाघवात्तु द्रव्यसाक्षात्कारत्वा अनंतावयवेतत्प्रागभावध्वंसादिकल्पनागौरवं
तु फलमुखत्वान्न दोष इति वाच्यं। फलमुखगौरवस्यापि क्वचिद्दोषत्वात्। जन्यद्रव्यत्वमपेक्ष्य द्रव्यलौकिकसाक्षात्का
रत्वस्यैव लघुत्वात्। तत्वया महत्वोद्भूतरूपयोस्तदाघवच्छिन्ने हेतुत्वस्य कल्प्यत्वाच्च अस्तु :संयोगस्यैव केवलानुवृत्तः
संयोगादिव्याप्तं। न वैजात्येन हेतुत्वसंभवाच्च। तादृशसंयोगविशिष्टवृत्तित्वादिकं गुणादिकेशैत्याप्रसक्तेतंत्रमि
तिकेवलाणुद्व्यणुकादिगुणाव्यपसक्तत्वेपि न त्र्यणुकादिगुणाव्याप्तत्वात्। एतेन योग्यानां रूपादीनां गुणानां क
र्मणां चाणुसमवेतत्वात्प्रत्यक्षतापत्तिरित्यपास्तं। अणुगुणानामपि केषांचिद्योग्यत्वात्। न च तंतूनामेवप
टत्वेन तंतुषु पट इत्यादिधीनस्यात् स्यादेव तंतुषु तंतुरित्यादिकमपीति वाच्यं। फलबलेन विलक्षणसंयोगव
त्त्वरूपतंतुत्वादेरेव विलक्षणसंयोगवत्त्वरूपपटत्वादिविशिष्टाधारतावच्छेदकत्वस्वीकारात् अन्यत्रः पटो वि
नष्ट इत्यादिप्रत्ययवत् (शिखी) विनष्ट इत्यादिप्रत्ययवत्। विशेषणपटत्वादिघटकसंयोगस्योत्पादविनाशविष
यकः।। एतेनोत्पादादिप्रतीतिः परमाणुपुंजोत्पादादिस्वीकारे एकस्य पटस्योत्पादादिकल्पनैव युक्तापि

राम

७३

६६

रंपरया संयोगनाशस्तन्तुनीति विषय इति चेत् महदादिनाशदशायां विद्यमानस्यापि तंत्वादेर्नाशप्रसंगापत्तेः। पर
परया संयोगनाशस्य तंत्वादावपि सत्त्वादित्यपास्तं। तंतुर्नष्ट इत्यादिप्रतीतिर्विशेषरतीमूत्तनतन्तुत्वघटकसंयो
गनाशविषयकत्वात्। अन्यथा शिखी नष्ट इति वृक्षच्छिन्नत्वनाशकाले विद्यमानं दंडशालिनि दंडी नष्ट इति प्रती
तो सत्त्वापत्तेर्वीरत्वात्। एककः पट इति प्रतीतिस्तु एकत्वं न मितिवत्समूहैकत्वविषयिणी। एतेन पटो महानिति प्रती
तीत्यनुपपत्तिः। अवयवानां महत्त्वात्संसर्गवादिनि परास्तोपिदु। संयोगविशेषस्यैव महत्त्वरूपत्वान्महत्त्वस्य सं
योगत्वव्याप्यत्वादिति महाननुधान्यराशिरित्यादिप्रतीतिरित्युमेवस्वरूपपरास्तु टावेव विश्रामे महत्तु टिप्पु जएवं
घटादिरितिनानुपपत्तिलेशोपि। अथ समांशुक्रिययांशुसंयोगनाशात्तंतुनाशस्तन्नाशात्पटनाश इति स
म्भवति न तु तत्रापीति चेन्न। विलक्षणसंयोगवत्त्वावच्छिन्नपुंजात्मकस्य पटस्य पत्त्विंचित्संयोगनाशेपि ना
शाद्यत्वं किं विचित्रकुक्रियया तंतुत्वघटकसंयोगानां युगपदेवनाशेति लाघवात्। अत्र हि क्रमेण नाशे लाघवं संस
भवो वेत्याहुः। तदसत्। विलक्षणसंयोगवत्त्वावच्छिन्नत्वस्य पटत्वादिरूपत्वे तावत्त्वस्य लक्षणत्वादिरूपस्य प्रति
संधानं विना पटत्वादि प्रत्ययो न स्यात्। विलक्षणविलक्षणसंयोगवत्त्वादिकमेव पटत्वं तंतुत्वादिकमिति

प०मा चैत्रापटत्वटाद्यारंभकतंतुकपालादेरारंभकस्यांशुकपालिकादेर्नाशेपि सम्बन्धमतेपटघटाद्यारंभकविजाती
यसंयोगसत्वेपटादिप्रतीत्यापत्तेः॥ नचतन्नाशान्नहि जातीयसंयोगनाशः॥ तदवच्छेदकावच्छेदेन तंतुकपालादि
७५ क्रियाभावात् किंचतंतुसंयोगात्पटउत्पन्नइत्यादिप्रतीतिव्यवहारादेर्यथार्थ्यापत्तिः॥ अपिचतंत्वादिभे
दग्रहं विनातत्संयोगग्रहाभावेपि पटत्वादिप्रतीतेर्न विलक्षणसंयोगमेव पटत्वादिकमिति संयोगत्वे
न ग्रहे भेदग्रहापेक्षा न तु घटत्वादिघटकत्वे जात्येनेत्यपि कथ्यता॥ अथैवं घटत्वादेर्जातित्वानुपपत्तिः॥ मृ
त्स्वर्णरजतपाषाणादिघटेषु मृत्त्वस्वर्णत्वादिनासांकर्यादितिचेन्न मृत्त्वस्वर्णत्वादिव्याप्यस्य नानाघ
टत्वादेः स्वीकारात्॥ नच घटत्वादिव्याप्यमृत्त्वाद्येव नानास्तु न तु हि नाना मृत्त्वस्वर्णत्वादिकल्पनापत्तेः कुला
लस्वर्णकारादिजन्यतावच्छेदकतया मृत्त्वस्वर्णत्वादिव्याप्यनानाघटत्वादेरावश्यकत्वाच्च॥ नहि स्वर्णघटादौ
चक्रादिकं मृद्घटादौ लौहवह्न्यादिकं हेतुरनुगतधीस्तु कथंचित्सौसादृश्यान्तु घटपदं तु नानार्थं (ये)॥ न तु घट
त्वदण्डत्वादिकमेकत्वहेतुकार्यकारणतयोः अवच्छेदकं मृत्त्वादिकमेव वा एकत्ववृत्ति॥ घटत्वादिकं तु सोव राम
र्णीशरावसुपष्टभकपृथिवी२वृत्ति। कार्यकारणभावानावच्छिन्नांसासात्समानाधिकरणौ रवच्छेदौ विभातः॥ कु ७५

त्वालस्वर्णकारादेर्विजातीयकृतिमत्त्वेन च कालादिलोहवर्तुलादेश्च कथंचिद्विजातीयसंयोगव्यापारकत्वेन एकत्वा
दिनिष्ठे नैके नैव वैजात्ये न हेतुत्वं। अन्यथा च कालादिकं विना क्वचिन्मृदादिघटादेरुत्पत्तेर्व्यभिचारो दुर्वारः। अथ घटत्वादिकं
रूपादिवृत्त्येव किं न स्यादिति चेन्न स्यात्। नीलत्वतिक्तत्वसुरभित्वकठिनत्वादिना सांकर्यात्। द्वित्वद्वित्वे पृथक्कालयोरनंतत्वात्। अ
ग्रयभेदाद्यग्रहेऽग्रहाच्च। एकपृथक्त्वावधिज्ञानव्यंग्यत्वेन विलंबितोपस्थितिकत्वात्। नव्यमते गुरुत्वाभावाच्च। अतएव
न परत्वादावपीति तन्न। एकत्वस्यैक्यात्। दोषादेकत्वाग्रहेऽपि घटत्वाग्रहाच्च। नव वस्तुः संयुक्तेत्वाग्रयसंबंधेन वृत्तित्वमपि
सन्निकर्षः गौरवात्। घटत्वादिवदेकत्वत्वादिग्रहापत्तेश्च। परंतु घटत्वादिकमस्तु संयोगागतघटादित्वहेना अग्रयभेदग्रहा
घेपेत्ताकिंतु संयोगत्वादिग्रहमस्ते साधुः। एकदेशिनस्तु परस्पराभावसमानाधिकरणयोपाध्योरेकाधिकरणवृत्तित्ववत्त्वाद्
जात्यो तथात्वमपि ग्रामाणिकं चेन्न दोषायेति घटत्वादिकं जातिरेवानुगतमिसाधुः। नस्माद्व्यक्तगत्या विलक्षणसं
स्थानावच्छेदेन सन्निकर्षात्तद्व्यगतघटत्वादिग्रहः। नन्वाद्यके रूपात् द्विनाशभेदाद्विघ्नस्यानुपपत्त्या चावयवी एव
गेवेति सिद्धं। अथावन्नानावृतत्वविरुद्धधर्माध्यासादेवावयवी भिद्यतां। न वा वच्छेदकभेदाद विरोधः। तत्र्चेद्वीन्द्रेप
वयविनीन्द्रियसन्निकर्षसत्त्वे परिमाणादिग्रहप्रसंगादिति चेन्न। परिमाणादिमहत्त्वसापेक्षत्वात्। तद्वत्तहस्तवितस्तित्वा

प॰मा॰ द्विजातिग्रहे तु यावदवयवावच्छेदेन सन्निकर्षो हेतुः । असक्त तथापि सकंपत्वनिष्कंपत्वाभ्यां भेदः । हस्तकंपने हि पादयोः शरीरस
कंपं निष्कंपं च रोरयो । न च कंपतदभावावेकत्र विरोधात् । कर्मणो व्याप्यवृत्तित्वादिति शरीरं भिन्नमिति चेन्न । पादयोरेव
तत्र कंपस्वीकारात् । कंपहेतुत्वाभिघातादेः फलबलात्पादयोरेव कल्पनात् । पादयोः शरीरं स्खलतीति धीस्तु पादावृत्तिक
६५ परम्परासंबंधविषया । साक्षात्संबंधविषयत्वे भ्रम एव । न च साक्षात्संबंधेनावच्छेदकाभावात् परंपराविषयकत्वं भ्रम
त्वं वास्ति हस्ते । अन्यथा सकंपमेव शरीरं निष्कंप धीस्तु चरणादिवृत्तिकंपाभावस्य परंपरासंबंधविषयिणीत्येव किं न स्यादि
ति वाच्यं । पादयोः कर्मणो वृत्त्यलाघवस्यापपन्नावतिरिक्तशरीरकर्मकल्पनाया एव बाधकत्वात् । कंपाभावस्य त्वन्यत्र कल्प
न एव शरीरे कल्प्यते इति न गौरवं । न चैवं कर्मणोऽणुमात्रगतत्वं हि मात्रगतत्वं वा स्यात् । तत्कर्मणो वान्यत्र च न
येऽणपत्तेरिति वाच्यं । सर्वावच्छेदेनोपलभ्यमानकर्मवति शरीरे कर्माभावोपलंभप्रसंगात् । एतेनास्तु शरीरारब्धाव
त्ववयविन्येव क्रियासेव हि पादयोरितिनावयवे क्रियाकल्पने गौरवमित्यपास्तं । पादयोः कर्माभावोपलंभापत्तेः
परंपरासंबंधस्य दोषत्वे च रणादावपि तदनापत्तेः दोषत्वकल्पने गौरवाच्च । किंच पादाद्यवयवक्रियैव परंपरया
वयविनि शरीरादौ संयोगः संभवति । न तु शरीरादिक्रिया पादाद्यौ । न चैव शरीरस्य निष्कंपत्वे चरणे शरीरं न चल राम ७५

तीतिवत्यारंभे न चलतीत्यपि स्यादिति वाच्यं शरीरत्वादेरिवपरशे‍ः कर्माभावानवच्छेदकत्वात्। अथैवमुक्तयुक्त्या
प्रादिनिष्ठसंयोगादेरवृत्तेः सादृश्यप्रतीतिः सम्भवे संयोगाद्यपि व्याप्यवृत्त्येवास्त्विति चेन्न। अंशस्यावच्छेदेन नन्तुद्रव्यसंयोगाद
पि पटोत्पत्तेः। न चांशुसंयोगादेशावेव पटोत्पत्तिः न तु तत्त्वेन पटस्य समवायित्वादिति प्राचीनमतनिष्कर्षः। नव्यास्तु। चल
तिशाखास्समुदायेन निश्चलेपि मूलेवृक्षस्य चलतीत्यबाधितप्रतीतेः कर्माव्याप्यवृत्त्यपि स विषयावृत्तिर्व्याप्यवृत्तित्वजाते
र्व्याप्यवृत्तिवृत्तित्वाभावनियमस्याप्रयोजकत्वादसिद्धः। इत्थमेव सासास्नेवृक्षे न वृक्षसादौ मूलाद्यवच्छेदेन चलनाभा
वस्य वृक्षादिप्रमाणप्रपमित्याहुः। इदमत्र विचार्यते। किमसत्क्रियते सदेव वा। सत्क्रियतेइति सांख्याः। तदाहुः। असद
करणादुपादानग्रहणात्सर्वसंभवाभावात्। शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्यम्। असतः श
शविषाणादेः सत्त्वस्य कर्तुमशक्यत्वात्। सतएव हि सत्करणात् इदमेव त्वात् दृष्टं च तिलेषु सत एव तैलस्य निःपीडने
न करणम्। असतः करणे न निदर्शनम्। उपादानग्रहणात्संबंधादपि सत्कार्यं। नह्यसतः संबंधोस्ति। असंबद्धमेव का
र्यं कारणैः क्रियतइति चेन्न। सर्वसंभवाभावात्। असंबंधाविशेषे सर्वं सर्वस्मात् भवेत्। न चैवं तस्मात्कार्यं प्रागुत्पत्तेः
कारणेन संबद्धं। यथाहुः। असत्त्वान्नास्तिसंबंधः कारणैः सत्त्वसंगिभिः। असंबद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिः। किं च

प॰मा॰ शक्तस्यजनकत्वेतिप्रसंगाच्छक्तस्यतज्जनकत्वाच्छक्तिस्वास्यनसर्वत्रतथैवानियमसंभवात्॥ किंतुक्वचिदेवेतिकथमसतिका

रणस्यशक्तिर्नियतास्यात्॥ असतोविषयत्वायोगात्। तस्माच्छक्तस्यशक्यंशक्तिविषयोयस्तत्कारणात्प्रागपिशक्यं

76 सदेव। किंचकारणाभावात्कारणात्तद्भूलादपिसत्कार्यं। नत्ववयवीअवयवेभ्योन्यस्तथाप्रतीत्यभावात्। कपालघटी

भूतेतंतुःपटीभूतःस्वर्णीकुंडलीभूतमित्यादिप्रतीतेः। उच्यते। यदिकारणव्यापारात्प्रागपिपटस्ततंतुषुसन्नेवकिं

मित्युपलब्धिकारणेषुसत्सुसत्यामपिजिज्ञासायांनोपलभ्यते। अनाविर्भूतत्वादितिचेत्। कोयमनाविर्भावः। उप

लब्धेरभावश्चेत्सर्वदैवानुपलंभापत्तिःस्वोत्पत्तेःप्राक्स्वाभावसत्वादात्माश्रयप्रसंगाच्च। अथोपलब्धियोग्यार्थक्रि

याकारिरूपविरहोनाविर्भावइति चेदसत्कार्यवादः। तादृक्रूपस्यप्रागसतःपश्चाद्भावात्। नचघटादेःप्राथमिको

पलब्ध्यावुपलब्धिमात्रमेववाच्यं तुरादिवत्कुविंदादिकारणसमुदायोविजातीयावयवसंयोगोवाहेतुः। विजातीया

वयवसंयोगाद्यवच्छेदेनसन्निकर्षस्यैवत्वात्तथेतिव्यंजकाभावात्सतोप्यनुपलब्धिरितिवाच्यंकारणसमुदायादेःप्रा

गसत्वेसत्कार्यवादात्। सत्वेतुप्रागुपलब्ध्यापत्तिः। प्राक्तत्रैवाविर्भूतोव्यंजकइतिचेत्। आविर्भावस्यापिसदसद्वि राम

कल्पग्रासात्। विद्यमानप्रागभावप्रतियोगित्वस्यवर्तमानकालासंबंधित्वस्यवासत्वस्यविद्यमानत्वस्यसत्वस्यचन ७६

मिथोविरोधः कालभेदेनैकत्रसमावेशात् । उपादानेनसमं समवायरूपसंबंधोपि नित्यत्वान्नानुपपन्नः । शक्तिःकारणता ।
प साचासतोपिटादेस्तत्वाद्दावेवत्वभावात् । शक्तिनियमेपिस्वभावभेदस्यैवाश्रयणीयत्वात् । कार्यकारणयोश्चमिथोभे
दएवअन्यथाकार्यकारणभावस्यैवानुपपत्तेः । अथैवंशततमाषकेभ्यश्चशततमाषकारब्धेवयविनिगुरुत्वाधिक्यात्गु
रुत्वाविदवनतिविशेषःस्यादितिचेन्न । गुरुतरद्रव्ययोः समयोस्तौलनेएकत्रसंलग्नत्वादिगुरुत्वाधिक्यात्तत्र
नवनतिवद्रुपपत्तेः । अवयविन्यपितापकृष्टगुरुत्वस्वीकारात् । अस्तुवापरमाणावेवगुरुत्वंद्व्यणुकादेरधःसंयोगस्तु
पा गुरुत्वसापेक्षपातजन्यावयववेगजवेगाधीनक्रियया तैव्यवहारश्चवर्तिस्थदीपयानव्यवहारवद्गौणः । नचनोद
नाभिघातसापेक्षायाएवपातक्रियायावेगजनकत्वेननतुगुरुत्वसापेक्षायागुरुत्वादेवोत्तरोत्तरकर्मसंतानसंभवा
दितिवाच्यं अधःसंयोगस्यक्वचिदभिघातात्मकस्यविनावेगमसंभवात् (वेगेनपतति) इत्यादिव्यवहाराच्चान चैवंम
हावयविपातेमहाविलंबः मिथोविष्टब्धावयवानांमिथोविष्टम्भाधीनक्रियाजन्यवेगेनोत्पवयविनिद्रुतवेगसंभवा
त् । अस्तुवापरंपरयासंबंधविशेषेणवापरमाणुगुरुत्वमेवपतननियामकं । गुरुत्वएवंमामानाभावः । वायुतेजसो
स्तिर्यगूर्ध्वगमनवत्वात्तयोः पृथिव्योरधोगमनस्यासतिप्रतिबंधकेदृष्टवदात्मसंयोगादिनैवोपपत्तेः । पतनप्रकर्षस्त्व

म

प.मा यवाधिक्यादवयविनि गुरुत्वापकर्षे त्वयापि तथैव वाच्यत्वात्। अथावयवावयविनोर्गुणगुणिनोर्देशभेदे ऽप्यभेदो ऽस्ति। समवा
यस्थानीयस्य तादात्म्यस्य भेदे ऽपि संभवादिति चेन्न। आत्माकाशादेर्ज्ञानशब्दादिना तादात्म्याभावात्। घटो नीलिमेत्या
दिप्रतीत्यापत्तेश्चेत्यन्यत्र विस्तरः। कार्यं त्रिविधं शरीरेन्द्रियविषयसंज्ञकं। तत्र शरीरं द्विविधं योनिजमयोनिजं च। योनिजं शु
क्रशोणितसन्निपातजं। तद् द्विविधं जरायुजमण्डजं च। मानुषपशूनां जरायुजं पक्षिसरीसृपाणामण्डजं। अयोनिजं देवर्षीणां
शरीरं धर्मविशेषसहितेभ्यो ऽणुभ्यो जायते। स्वेदजं तु नां तु यातनाशरीरं धर्मविशेषसहितेभ्यस्तेभ्य इति। ननु योनेः शरी
रहेतुत्वात्कथं तां विना शरीरमिति चेन्न। शरीरत्वस्य साक्षाज्जलूकामिमशकादियोनिजसाधारणेऽपि न व्यभिचाराच्छरीरत्वाव
च्छिन्ने तद्धेतुत्वाभावात्। शरीरविशेषे तद्धेतुत्वं न बाधकं। श्रूयते च ब्रह्मणो मानसाः सनकादयः पुत्रा इति। किं च स्वर्गिणां
गर्भवासादिवेदनावत्तेनारकिणां चानुषंगिकयोनिस्पर्शजसुखवत्त्वविरुद्धमिति न तेषां योनिजत्वा न च तेषां गर्भवा
सादिकल्पवेदनाहेतु। अदृष्टविपरीतकल्पनापत्तेर्न चेष्टव्यं रस्य वृत्तेस्संभवात्। तस्माददृष्टाभावेन न तत्संभवादिति कर्मैव स्वस
याघभोगनिर्वाहकं शरीरमर्जयति। येन तु कर्मणा गर्भवासादिदुःखमपि भोक्तव्यं तेन योनिजमुत्पाद्यते इति विशे राम
षः। अथ तथापि शरीरं नष्टपृथिवीनिदाघोष्मणा द्रवीभावेन जलाकारत्वात्। हिमवत्पानजलं गंधवत्त्वेन पृथिव्यावयवत्वा ७१

रूपादि पृथिवीरूपादिकं प्रति तदितररूपादेः प्रतिबंधकत्वात् शरीरस्य नीरूपादित्वापत्तेः नच
नीलपीतरूपात्मकं वस्तु चित्ररूपवद्घट इति ध्येयम् ४

तच्चात एव चतनेजः श्रमत्वपि। किंच पृथिव्यादिविजातीयां मूतनतुष्कप्रकृतित्वात्। न चैवं गंधवद्वीभावकरादिस्थकुसुमरूपा
दिपशष्टेन्निहेतस्यस्पर्शवत्त्वकल्पकारित्वेभ्यः सिद्धं यदृष्टमेवकाशविषयात्वादाकाशप्रकृतित्वमपियुक्तं। अत्रजन्यदेशशरीरस्या
च भौतिकमितिप्रसिद्धिः। नथाप्याकाशस्यनिः स्पर्शत्वेन विभोरेकस्य पूर्वेद्व्यवस्थत्वेन वापरद्रव्यारंभकत्वात् पपन्नत्या
सम्पन्नड इति चेन्न। तथापि रसाद्यनुपपत्तेः। नीलपीतादिवत्पृथिवीजलादिरूपाणां चित्ररूपजनकत्वस्यादृष्टत्वाच्च। एतेन
नि गंधेनागंधोत्पादनं लीलावत्युक्तं विरुद्धं। अवयवगंधेनावयविगंधोत्पादस्यावयवांतरवृत्तिनागंधाभावेन वारयितुमश
क्यत्वादितिदीधितिकृतो। किंतु चित्रं सौरभादेस्तदितरगंधप्रतिबंधकत्वेविरुद्धगंधवदारब्धे निर्गंधिसगंधाभ्यामारब्धे
व्याप्यवृत्तिगंधापत्तेः सौरभाद्यभावस्यैव तत्त्वादिति। किंच पृथिवीजलादेः पृथिवीजलादिकं प्रत्येवजनकत्वान्नहि
नीलपीतादेश्चित्रजनकत्ववद्विजातीयजनकत्वप्रकृतेप्रामाणिकं येन पृथिवीशरीरे जलादिधर्मत्त्वोपाधिकं इति श
रीरत्वं च चेष्टावद्वृत्त्यावयविमात्रसमवेतजातिमत्त्वाद्यदृष्टत्वादिवारणाय वृत्त्यन्तेहस्तत्वसत्त्वाद्रव्यत्वादिवारणाय स
मवेतांतं। घटशरीरसंयोगादिवारणाय जातीतिनित्यार्थकं। अथ चेष्टाशून्येवृत्ताद्दिशरीरेव्याप्तिः। न च चेष्टावत्तिन य दि
शरीरेवर्तमानानां शरीरत्वव्याप्यजातिमादाय तत्र संगतिः। जलत्वाद्यसंकीर्णायाः पृथिवीमात्रवृत्तेर्नरत्वानरादि सकल

धिव्याप्यनारंभो विजातीयारंभकत्व थविकल्प्येत ति नद्विविधं तत् पांचभौतिकत्वप्रसिद्धिस्तु
एवं निमित्तनेकस्य समवायिकत्वं न बोध्यम् ४

एका मांसलशरीरेष्वनुगतमतिसिद्धायाजातेर्दृष्टत्वलनादिनिष्ठत्वेमानाभावादितिवेन्नाद्दृष्टत्वलनादेरपिचेष्टास्वीकारात्।कथमन्य
थासत्त्वावरणोवक्रगत्यादिकं।यदिच जलादेरिववक्रगत्यादिकंप्रकृतेचाध्यात्मिकवायोरपितत्संभवतिदृष्टान्तादौसुखदुः
खाभावादिरूपेष्टसाक्षात्कारसत्वेपितत्साधनताज्ञानेमानाभावात्तदुच्छ्रायसंभवेनचेष्टायाअभावादितिस्मृत्स्वमी
स्यते।नद्दाभोगायतनत्वंतत्त्वावयविमात्रवृत्तिजातिमत्त्वेनतत्।नचैवंचरशरीरेव्याप्तिः।कृम्यादिशरीरेनरत्वादेःसत्त्वेनन
रसिंहशरीरेनरत्वादेःसांकर्यापत्तेरसत्वेपिसकलमांसलवृत्तकजातेःसत्त्वेनाव्याप्त्ययोगादितिदिक्।इंद्रियंघ्राणा
नत्वंगंधव्यंजकसर्वज्ञात्वंनोजलाद्यनभिभूतैःपार्थिवावयवैरारब्धं।श्लेष्मादिजलाभिभवेगंधाग्रहात्जलाद्यनभि
भूतैरिति।एवमग्रेपि।इंद्रियत्वंचस्मृत्यजनकज्ञानजनकमनःसंयोगाश्रयत्वं।स्मृत्यजनकःस्मृतिस्वरूपायोग्यः
।मनःसंयोगोमनोवृत्तिसंयोगः।नातःस्मृत्यनुपधायकचक्षुरादिसाधुपधायकमनोयोगवत्यात्मादावतिव्याप्तिः।न
चामनःप्रतियोगिकसंयोगवत्त्वविरहाद्धीमनस्यव्याप्तिः।मनस्त्वेणेंद्रियाव्याप्तिः।त्वङ्मनोयोगमात्रस्यस्मृतिस्व
रूपायोग्यत्वात्।तस्यजन्यज्ञानमात्रहेतुत्वात्।अन्यथासुषुप्तिकालेज्ञानोत्पत्त्यापत्तेः।नचसर्वदासर्वेंगीणाकृष्टेन राम
त्वविमानाभावाद्व्यभिचारः।तादृशपुरुषेमानाभावात्।अथतत्कालेचाक्षुषादिज्ञानानुत्पादस्यस्वरसेविषये। ७८

मनसा च संयोगाद्यभावात्। अनुमित्याद्यनुत्पत्तिर्व्याप्तिज्ञानाद्यभावात्। न च सुषुप्त्यनुकूलमनःक्रिययात्ममनःसंयो-
गनाशकालोत्पत्तिकपरामर्षेण सुषुप्तिसमकालोत्पत्तिकमनोयोगसहकृतेन सुषुप्तिद्वितीयक्षणेऽनुमितिरुत्पाद्य-
तामिति वाच्यं असमवायिनः कार्यसहभावेन हेतुत्वान्मनोयोगनाशकाले परामर्षोत्पादासंभवात्। तत्काले परामर्शोत्प-
त्तौ मानाभावः। तत्सामग्रीभूतव्याप्तिस्मृत्यादेः फलैककल्प्यत्वादित्यन्ये इति चेत्। न तत्काले आत्मादिमानसोत्पत्तेर्विना त्वङ्म-
नोयोगहेतुतां दुर्वारत्वादिति मैवं। आत्मनो विशेषगुणोपधाने नैवमानेन तद्वा विशेषगुणाभावात्तस्य तत्साभावात्तत्त-
द्गुणानां विषयतया तद्धेतुत्वात्। विशेषगुणाजनकात्ममानसत्वस्यैव मनोयोगादिकार्यतावच्छेदकत्वाद्वा। यद्वा चर्म-
मनोयोग एव जन्यज्ञानमात्रे हेतुस्त्वङ्मनोयोगस्य रासनादिकालेऽनुपगमात्। चर्मत्वं तैजसादिचर्मसाधारणं तज्जा-
तिरिति चेन्न तथापि मानसत्वावच्छिन्न एव त्वङ्मनोयोगो हेतुर्न तु जन्यज्ञानत्वावच्छिन्ने न चैवं त्वाचत्वावच्छिन्ने पृथक्कारण-
त्वे गौरवं प्रामाणिकत्वेन तस्यादोषत्वात्। अन्यथा रासनाद्युत्पत्तिकाले ज्ञानमात्रहेतोस्त्वङ्मनोयोगस्य सत्त्वे कथं न त्वाचो-
त्पत्तिरिति वाच्यम्। सुषुम्नारसनमनोयोगादेस्त्वाचप्रतिबंधकत्वे त्वति गौरवं। जन्यज्ञानत्वावच्छिन्ने हेतुत्वेऽपि तत्त्वस्य नाना-
त्वात्। नानाकार्यकारणभावद्वैयाप्त्व जन्यप्रत्यक्षत्वावच्छिन्ने तस्य हेतुत्वमित्यन्ये। वस्तुतस्तु परात्मादेः परस्यापत्त्य

प.मा. त्वाय विजातीयात्ममनोयोगेऽज्ञानाभावात् इत्थं च त्वक्शून्यपुरुषसत्त्वेऽपि त्वेनात्ममानसे हेतुनावाच्या । तदेव च वैजात्यं ज
न्यज्ञानसामान्यासमवायिकारणतावच्छेदकमपीति तादृशसंयोगाभावादेव न सुषुप्तौ ज्ञानोत्पादस्तदा तादृशसंयोगमा
नाभावात् । इत्थं च त्वक्शून्यपुरुषसत्त्वेऽपि न क्षतिः । जीवनयत्नरक्तनाडिजितहेतुजीवनादृष्टादेव श्वासप्रश्वाससंभवात्
। सत्त्वेऽपि तद्दृष्टसहकृतात्ममनःसंयोगमात्रादेवेति तद्धरोद्धेन न तदा नत्तत्कल्पनं । न च यत्नवत्त्वात्मक्रियया त्वङ्मनःसंयोगना
७१ शे पुरीतत्क्रियया पुरीतन्मनोयोगः सुषुप्तिः समुत्पद्यते न तत्र प्राक्तनात्ममनोयोगोऽस्तीति वाच्यं । सर्वत्र मनःक्रिययैव सुषु
प्तिस्वीकारात् । तदुक्तं यदा मनस्त्वचं परित्यज्य पुरीतति गच्छति तदा सुषुप्तिः संपद्यते । इदं तु वक्तगतिमतुरुध्यत्वज्ञनो
योगस्य तज्जन्यज्ञानमात्रहेतुत्वेऽपि ज्ञानासमानाधिकरणज्ञानकारणमनःसंयोगाश्रयत्वस्य ततत्वराणात्वाव्यवाततात्वेस ल५
ज्ञातित्वात्त्वङ्मनोयोग एव तज्जन्यज्ञानसामान्यहेतुर्न तु शरीरमनोयोगः शरीरत्वस्योपाधित्वात् सुषुप्तिकाले तत्सत्त्वाच्चे
ति शरीरे नातिव्याप्तिः । यद्दिवसमवायेन चैत्रीयशरीरमनोयोगस्य शरीरनिष्ठस्यावच्छेदकता तया चैत्रीयज्ञाने हेतुत्वं ।
तदाज्ञानसमानाधिकरणज्ञानकारणसंयोगानाश्रयवृत्तिमनोवृत्तिज्ञानकारणसंयोगाश्रयत्वं तत् । शरीरात्ममनःसं राम
ज्ञानसमानाधिकरणज्ञानकारणसंयोगाश्रयत्वात् शरीरमनोयोगात्ममनोयोगयोर्न तदनाश्रयवृत्तित्वमित्यात्मशरीरयोः सं ७९

संयोगविशेषस्तेन शाखामिकवृत्त्यंतेन व्युदासः। शरीरतदवयववता आदिनात्मसंयोगएवचेष्टावदात्मयोगत्वेनहेतुः। अतो
न ह्व प्रवहनाडीमनोयोगमादायतत्रास्त्राप्तमतिव्याप्तिश्च सुषुप्त्यादिसंयोगमादायघटादावतिव्याप्तेर्वीररणार्थमनोवृ
त्तीति। मनोघटसंयोगादिकमादायतत्तर्थं ज्ञानकारणेतिशरीरावच्छेदेन प्राणमनःसंयोगत्वेन न हेतुत्वं किंतु शरीरप्रा
णसंयोगत्वेनैवेति प्राणमुदासइति समासः। विषयस्तु स्यादणुकादिक्रमेणारब्धस्त्रिविधोमृत्पाषाणस्थावरलक्षणः। तत्र मृ
त्प्राकारेष्टकादिः। पाषाणाउपलमणिवज्रादिः। स्थावरो वृक्षतृणौषध्यादिः। मृत्त्वं पाषाणत्वउद्भिसात्मकं स्थावरत्वं चप्रा
मान्यविशेषः। अत्र यद्यपि शरीरमपि विषय इति तस्तेनैवोद्विकुमुचितं तथापि शरीरत्वेन पृथक्कृतस्यार्थसाधनमेतिद्यो
तयितुं पृथग्युक्तिः। नचैवं वृक्षादयः स्थावराअपि शरीरभेदतयातत्रैवक्तुमुचिताः। नचासिद्धिः। वृक्षादयः प्रतिनियत
भोक्त्रधिष्ठिताः। जीवनमरणस्वप्नजागरणरोगभेषजप्रयोगवीजसजातीयानुबंधानुकूलोपगमप्रतिकूलापगमा
दिभ्यः प्रसिद्धशरीरवत्। नचैतेसंदिग्धाः सिद्धाः। आध्यात्मिकवायुसंवधात् क्षीपिमूले निषिक्तानाम पामोषध्वस्य चा
प्यादानात्। तदपि हृष्टाक्षतभग्नसंरोहणेन च। अन्यथा सर्वमिदमनुपपन्नं स्यात्। ननु दृष्ट्यादिकंगिरिपाषाणादाव
पीति चेन्नथापि नर्मदातीरसंलग्नाः सरत्न्लार्जुनपादपाः। नर्मदातोयसंस्पर्शात्तेयाति परमां गतिं १ गुरूंहुंकृत्या। तु

पञ्चा
८०

न्नत्ववादेनिजिमक्रामन॥ श्मशानेजायतेवृक्षः कंकगृध्रोपसेवितः २ इत्यागमानामप्रमाणत्वादिति चेन्न
सत्यं नेरादिमतश्च दुष्टचैतन्यावच्छेदकत्वस्य तेषामभावेनप्रायशो जंगमोपकारकत्वेन तदधीनत्वेन च तान्विषयेषु त
त्रीयत्वमस्तु इत्यादितमिति। अत्र शरीरपदेन तदवयवामांसास्थ्यादयस्तद्विकाराः क्षीरप्रभृतयश्च इंद्रियपदेन तदवयवाः वि
षयपदेन द्व्यणुकादयः पाषाणपदेन हरितालादयः स्थावरपदेन पत्रपुष्पादयः वृक्षपदेन काष्ठादयः तृणपदेन ना
लादयः ओषधिपदेन तद्विकाराः तिलतंडुलादयः संगृह्यन्ते। ननु चैतेषु गंधवत्तामात्रेण पृथिवीत्वं गंधवत्त्वस्य व्यंजकस्य स
त्वेन प्रत्यक्षसंभवात्रिर्गंधिमणिपाषाणादौ तत्कुत इति चेन्न इक्ष्वाणिगंधोपलब्धेः कठिनस्पर्शान्यपाकजवत्त्वाच्चेति गृहाणा ननु
वज्रे पार्थिवे च लोहलेख्ये स्यान्न स्यात्प्रयोजकत्वादिति कठिनस्पर्शस्य न त्वस्य तत्प्रयोजकत्वात्। स्यादेतत्। तैलघृत
वसादिकं न पृथिवी स्नेहवत्त्वात् नापि जलादिकं भस्मीभावात् किंत्वतिरिक्तमेवेति चेन्न भस्मीभावादेव तेषां पार्थि
वत्वात्। स्नेहोपलब्धिस्तूपष्टंभकजलोपाधिकी। तत्र तैलत्वादिकं पाकजविलक्षणरूपरसगंधादिनियम्यो जातिवि
शेषः प्रत्यक्षसिद्धः। यत्तु बीजक्षीरमांसप्रभवस्नेहवत्त्वं तत्र तिरिक्तेलादिस्थस्नेहवत्तो पि तैलत्वरसादिसारूप्यात्तु तत्व्य राम
पदेशस्तु गौरण इति तन्न। बीजत्वादावपि तैलत्वाद्यापत्तेः। बीजप्रभवत्वादिप्रतिसंधानं विनापि तैलत्वादिप्रतीतेश्च ८०

अत्रवाचस्पतिमिश्राः।तैलपदंसार्षपादीनामक्तंयोगरूढिभ्यांतिलप्रभवस्नेहवत्सेवमुख्यत्वादिनादुरितमलंपल्लवेन।ज
लमितरेभ्योभिद्यतेजलत्वात्।तच्चगंधस्थानेस्नेहनिवेशेनप्रागुक्तंचतुर्दशगुणावत्।तत्ररूपंशुक्लमेवकालिंदीजला
दौनीलिमाद्युपलंभस्तुसंसर्गिपार्थिवोपाधिकः।कथमन्यथावियतिनिक्षिप्तेनतत्रधावल्योपलंभः।रसोमधुरएव।न
चासिद्धिः।हरीतकीभक्षणोत्तरंपश्चात्जलपानेतामाधुर्योपलंभात्।अथहरीतकीमाधुर्यमेवजलेनव्यज्यतेयद्विचित्ररूप
वच्चित्ररसेमानाभावात्तुल्यविरोधेननीरसेवहरीतकी।षड्रसेतिव्यवहारस्तुषड्रसकार्यकारित्वात्।परपर्यायेण
षड्रसवत्त्वाद्वेतिविभाव्यतेतदानदवयवमाधुर्यमेवव्यज्यतामितिवेन्न।तद्वृत्तिकषायादिरसानामपितदोपलंभा
पत्तेः।जलसंयोगेनहरीतक्यांमाधुर्यमुत्पाद्यतइतिचेन्न।मुक्तोच्चावयवरसाजन्यस्यपृथ्वीरसस्याग्निसंयोगैकसाध्य
त्वात्।कर्कटीभक्षणोत्तरंजललोतिक्तरसोपलब्धिस्तुकर्कट्याधिकाकर्कघांजलपानान्मूत्रमपितिक्तरसोपलब्धे
स्तस्यास्तद्रसवत्त्वावश्यकत्वात्।एतेनजंबीरकरवीरनारंगिनीरादावम्लतिक्तलवणारसाद्युपलब्धिरपिव्याख्या
ता।अत्रद्वे।अपिजंबीरादावम्लरसाद्यनुभवेनतेषांतदीयत्वात्कर्कटीभक्षणोत्तरमरसनाग्रवर्त्तिपित्तदोषेणतदीयतिक्तरसो
पलब्धिरितिवैद्यकसिद्धं॥किंचनिदाघेनिःपीननिर्मलगंगासलिलमाधुर्यानुभवःसर्वानुभवसिद्धइत्याद्

पमा
८२
६।

रूपद्रवः ॥ एतेन हरीतक्यादिमाधुर्यमेव जलवंगपनान्यरसः फलत्वेन तथैव कल्पनादित्युक्तावपि न क्षतिः ॥ न चैवं पृथि
व्यां मधुररसवत्तीति जलौपाधिकास्यादिति वाच्यं अतिमुग्धेऽपि शर्करादौ उपलभ्यमानविलक्षणमाधुर्यस्य जलासं
भवित्वान्न तस्य तत्र पाकजत्वाद् इति समासः ॥ शीतएव स्पर्शो जले हेमविदु हमतोपलब्धित्वान्नपाद्योपाधिकी ॥ न चाशी
तस्पर्शो जल एव ॥ न च श्रीखंडेऽपि शैत्यमस्ति घर्षके जलशैत्यातिशयितशैत्यप्रतीतेरिति वाच्यं ॥ श्रीखंडसंयोगेन घर्ष
काजलस्यैव शैत्यातिशयवत्के ॥ श्रीखंडजातवह्निजलस्यैव विमर्द्दतस्पर्शैत्यातिशयप्रतीयनेइति दिक् ॥ स्नेहो भस्यैव
अत्रकेचित स्नेहो न जलधर्मस्तैलादाविव जलेनुपलब्धेः ॥ नापि पृथिवीविशेषगुणाः सर्वपृथिव्यव्यापकत्वात् किं
तु पृथिवीविशेषेषु तैलवसादावुपलभ्यमानो जातिविशेषवत्त्वात् ह्रस्वत्तदसत् ॥ स्निग्धस्निग्धतरादिप्रतीतेः सानि
शयत्वात्तानहि जातिरतिशयिता किंच तस्य जातित्वे क्षीरत्वादिवहाराणुकादिनिष्ठत्वा वा व्याप्त पृथिवीत्वादिव्याप
जानेः परमाणुवृत्तित्वान्न तथा च क्षीरत्वाद्यवच्छिन्नेपाकजरूपरसादिविशेषवत्स्निग्धत्वावच्छिन्ने नियामकोगुणोविशेषो
वाच्यः सचनसंभवति स्नेहस्यैव वासएव स्नेहः ॥ न च क्षीरत्वाद्यपि परमाणुवृत्त्यस्तु तथा सति न्यायादध्यादेरपि क्षीरत्वा रामं
द्यापत्तेः ॥ किंचैवं वत्तरत्वं क्षीरत्वादीनां साकर्यापत्तिस्तरत्वारादेरेकपरमाणावाद्वृत्तत्वात् ॥ न च रूपविशेषरसवि ८२

शेषादेस्तत्तत्रियामकस्य पाकेन पराहृत्तिवारणात्वादेः परावृत्तिः संभवति। अस्तु स्नेहत्वं गुणत्वाएवं तैलादावि
तिचेन्न। पृथिवीमात्रे तदापत्तेः गंधादिवद्दृष्टत्वादिकल्पनेद्रवत्ववत्त्वस्माकं जलत्वमात्रकल्पनेवागौरवं नं त्वत
त्वनीति स्नेहस्य जलोपाधिकीति दिक्। यत्तु जलावसेकात् सक्तुसिकतादिषु संग्रहहेतुः संयोगविशेषो धारणा
कर्षणहेतुर्जायते। स च न केवलाद्द्रवत्वात् स्नेहाद्वा। काचकांचनादिभिर्द्रुतैर्दुग्धैः स्त्रहिमादिभिस्तदनुत्पादात् किं
तु स्नेहद्रवत्वाभ्यां मिलिताभ्यामेवेति जले स्नेहद्रवत्वसिद्धिरिति तन्नाघतिरूक्षसांसिद्धिकद्रवत्ववता जलेनैव
संग्रहसंभवात्। एवं सति स्नेहसिद्धिः कुत इति चेदनुभवादिति दिक्। तद्द्विविधं नित्यानित्यभेदात्। नित्यं परमा
णुलक्षणं। तत्र गंधादिसमवायिकारणतावच्छेदकं पृथिवीत्वं परमाणौ जलत्वादिकं तु कुतः। न चानित्य
स्नेहसमवायिकारणतावच्छेदकत्वेनाद्व्यणुके सिद्धस्य जलत्वस्य स्पर्शवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातित्वेनारं
भकपरमाणुवृत्तित्वमनुमेयं परमाणौ स्तज्ञानिमत्ते नित्यस्य स्वरूपयोग्यस्य फलोपधानापत्तेः। यद्दिचानि
त्यस्यैव नित्यस्यापि सहकारिविरहात्फलानुपधानसंभवस्तदा नित्यवृत्तिर्वा किं जलत्वं स्पर्शसमवायिका
रणतावच्छेदकतया भूतचतुष्टयवृत्तिरिक्ता जातिरस्तु सैव च द्रव्यत्वसाक्षाद्व्याप्यतया परमाणुवृत्तिः। जला

प॰ मा
८२

गौ फलानुत्पादो समवायिकारणाभावात् । पाकजस्पर्शवति पृथिव्याः एव समवायिकारणत्वात् सदा सस्पर्शवत्वाच्च
अथैवं द्रव्यत्वमेव न स्यात् । किं तु कर्मजात्येति वेत् । किं जलत्वादिनेत्यपि तुल्यं । अत्र वदन्ति जलत्वतेजस्त्वेनावच्छिन्नत्वस्तल
एव सिद्धे वायुत्वं च कीचकादिप्रभवविलक्षणशब्दादिकार्यजनकतावच्छेदकतया सिध्यति । नान्यत्वयथायोगमनि
त्यानां स्नेहरूपस्वच्छरूपशीतस्पर्शानां सिद्धिं कटुकत्वानामुष्णस्पर्शभास्वररूपयोर्विजातीयानुष्णाशीतस्पर्शसमवायि शुक्लत्वेऽ
कारणानां यावच्छेदकानीति नित्यपरमाणुव्यावृत्तमाद्यपरमाणुकं जातित्रयं सिध्यति । तदवच्छिन्नसमवायिकारणताव
च्छेदकतया तद्व्यापकमपरं जातित्रयं परमाणुसाधारणं जात्योर्मिथो भेदाग्रहस्तु समनियतयोगव्यक्तिकल्प्या
द्व्यणुकाभेदाच्च । किं च जलत्वादिकं परमाणौ वर्तते चेत्सिद्धमीहितं नो चेन्नस्तदवच्छिन्नसमवायिकारणतावच्छे
दकतया परमाणुसाधारणजात्यन्तरसिद्धिस्तदेव च जलत्वादिपदप्रवृत्तिनिमित्तं । किंच तु । जलत्वादीनां जलत्वा
दिव्यापकजातित्वेन मूर्तत्वादिजातस्याभावे स्पर्शवद्वृत्ति द्रव्यत्वसाक्षाद्व्याप्यजातित्वेन तत्त्वे तत्साक्षाद्व्याप्यजा
तित्वेन च परमाणुवृत्तित्वसिद्धिस्तासामेव चानित्यत्वविशेषितानामनित्यस्नेहादिसमवायिकारणतावच्छेद
कत्वमित्याहुः परे तावद्व्यणुकमेव पृथिवीत्वादिकं पृथिव्यादिकं प्रति पृथिव्यादिमत्त्वेन विजातीयसंयोगत्वे राम
व ८२

नैवाबाहेनुत्वमित्याद्युरित्यस्मत्कृतवादमालायां विस्तरः। अनित्यं त्रिविधं शरीरेंद्रियविषयभेदात्। शरीरम
योनिजमेव वरुणलोके प्रसिद्धं। पार्थिवभागोपष्टंभाद्युपभोगसमर्थं। अयोनिजमेवेति कुतः भूमंडले योनिजबुद्बुदाकारशरीरानु
पलब्धेः। न चैवं नित्यमेवास्तु तत्। अपवर्गस्तु मनसद्रव्यत्वस्यापि सर्वथा विशेषविगमात्। वरुणलोकप्राप्तिस्तु तच्छरीरावच्छि
न्नसुखप्राप्तिरेवेति चेन्न। नित्यतायां निरवयवत्वव्याप्तत्वात्। हस्तपाद्याद्यवयवश्च निर्विरुध्येत श्रूयते च पुराणादौ वरुणलोका
दौ शरीरोत्पत्तिः। एतेन तैजसादिशरीरमपि व्याख्यातं। इंद्रियं पार्थिव्या घनमिभूतैर्जलावयवैरारब्धं रसग्राहकं रसनं। वि
षयः सरित्समुद्रा हिमकरकादिरूपः। करकापृथिवी कठिनस्पर्शवत्त्वादिति चेन्न। असिद्धेः। प्रतिरूढसांसिद्धिकद्रवत्ववत्त्वे
न सांसिद्धिकद्रवत्वाभावेनैव वातत्र काठिन्यप्रतीतेः। अन्यथा करकानाशोत्तरतदवयवारब्धे जले सांसिद्धिकद्रवत्वं प्रतीतम
द्रोतः करकायामेव घृतादाविव पाकाद्द्रवत्वमि[illegible]तिनुनयुक्तं द्रुते घृतत्वादिवत्करकात्वोपलंभापत्तेः। नैमित्तिकद्रव
त्वस्य निमित्तनाशप्रत्येन घृतादेवत्सनः पिंडीभावापत्तेश्चेति दिक्। तेजइतरेभ्यो भिद्यते तैजसत्वात्। तच्च रूपस्पर्शसंख्याप
रिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वसंस्कारवत्। शुक्लभास्वरमेव रूपं उष्ण एव स्पर्शः। सूक्ष्मसंस्कारो वेगस्थिति
निस्थापकौ। अथोष्णस्पर्शवत्त्वं न तेजोलक्षणं व्याप्तमूष्मणि गतत्वात्। न चोष्णा तेजः तैजसो द्रुतस्पर्शस्य द्रुतरूपव्याप्त

द्वि ३

त.भा ८३ त्वाद्विति चेन्न। पार्थिवो हि तत्स्पर्शेन तथात्वात्। आप्यादौ तेजःसंयोगेन तदभावात्। तच्च द्विविधं नित्यानित्यभेदात्। नित्यं परमाणुलक्ष
णम्। अनित्यं त्रिविधं। शरीरेन्द्रियविषयलक्षणम्। शरीरमयोनिजमेवादित्यलोके। पार्थिवावयवोपष्टम्भाच्चोपभोगसम
र्थम्। इन्द्रियं पृथिव्याद्यनभिभूतैस्तेजोभिरारब्धं रूपग्राहकं चक्षुः। अत्र केचित् चक्षुर्न प्राप्यकार्यधिष्ठानासम्बद्धार्थग्रा
हकत्वात्। यत्प्राप्यकारि तन्नाधिष्ठानासम्बद्धार्थग्राहकं यथा रसनादि। प्राप्यकारित्वे पृथुतरग्रहणानुपपत्तेश्च। ना
धिकस्याल्पस्य चक्षुषः पृथुतरप्राप्तेः सम्भवः। किं च शाखाचन्द्रमसोर्युगपद्ग्रहणं न स्यात्। न च वेगातिशयात्समाधिः। आ
परमाणावच्छेद्यानां गगनमन्तरेणावयविनो गमनाभावात्तेषां च भूयो बहुच्छेदेन संयोगासम्भवात्। अतिशयवेगवतो
पि सन्निकृष्टदेशसंयोगादिकं विना विप्रकृष्टदेशगमनासम्भवाच्च। अपि चैवं काचस्फटिकाद्यन्तरितोपलब्धिर्न स्यात्। त
स्मादप्राप्यकारि वस्तुतो न तैजसं किन्तु गोलकमेव विशिष्टादृष्टोपगृहीतं तेन प्रसराद्यभावाद्वृत्तिरित्याहुः। तत्र दीपप्र
भायामनैकान्तात्। चक्षुषो गोलक इव प्रभायामपि दीपोऽधिष्ठानं तदसम्बद्धार्थग्राहकत्वं च प्रभायां न च तत्राप्राप्य
कारित्वमिति। शाखाचन्द्रमसोर्ग्रहणे यौगपद्याभिमानः सूक्ष्मकालसन्निकर्षात् उत्पलपत्रसूचीवेधवत्। अविलम्बो हि तेज राम
सो वेगातिशयः। केचित्तु निःसरन्नयनतेजो बाह्यालोकसहकारेण युगपदेव तावदर्थेन संसृष्टं चक्षुरुत्पादयतीति ८३

शाखाचंद्रमसोर्युगपद्ग्रहः। न चैवं पृष्ठभागस्थितानामप्युपलंभापत्तिः अभिमुखत्वं त्विंद्रियप्राप्तावेवोपयुज्यत इति वा
संपृष्टदेशस्थत्वात्। आलोकैश्च तु सत्यादेमानाभावात्। चक्षुषो मूलावच्छिन्नवत्पृष्ठावच्छिन्नस्यापि संयोगस्य ग्राहकत्वसंभ
वाच्चेत्पाद्रुः। अननुगत्या वेगविशेषवशाद्धि नैव सन्निकृष्टदेशविशेषसंयोगं विप्रकृष्टदेशे संयोगः अंतरावस्थितघनद्रव्य
विशेषाणामेव तत्प्रतिबंधकत्वादिति। अन्ये। काचाद्यंतरितोपलब्धिः स्फटिकाद्यंतरिते स्वच्छतयाऽभावच्छयनगत्यविरोधित्वात्।
किं च चक्षुषोऽप्राप्यकारित्वेऽभिन्नाद्व्यवहितस्यापि ग्रहः स्यादिन्द्रियाऽद्भित्त्यादिकं हि प्राप्तिविघातकं तथैव विरोधि न तु
स्वरूपसन्नयातथात्वेन स्मिन्नति क्वचिदपि कार्यं न स्यात्। न च तन्त्रिन्द्रिये स्वस्वप्राप्यादिस्थपुरुषसाक्षात्कारे स्वस्वप्र
तीच्यादिवर्तित्वसंबंधेन प्रतिबंधकत्वं गौरवात्। यत्तु व्यवहितमप्राप्यत्वादेव न गृह्यते न तु व्यवहितत्वादिति तन्न। अप्राप्यत्व
ह्निन स्वरूपायोग्यत्वं स्थैर्यपक्षे तस्यैव कालांतरे ग्रहात् क्षणिकत्वपक्षेपि प्रत्यासन्नानां सहकारिणामेव तत्रातिशयजनक
त्वेनाप्रत्यासन्नानां प्रत्यासन्निस्वभावोत्पादनानिरंतरोत्पादोऽस्माकं तु द्रव्ययोः संयोगः तद्रूपमपि कृत्स्नसारस्यार्थेन। तत्सम
वायिनां किंतु न द्वाभ्रितस्यानींद्रियेंद्रियस्यागतिक्रमेणोत्पत्तेरेव नंतत्र चक्षुः। क्रियासंयोगविभागतत्कार्यकारणाभावादिके
ष्वनामपेक्षतत्तत्फलकादिक्रियादेशांतरचाक्षुषत्वमेवोचितमिति किमतिरिक्तचक्षुषेत्यादुस्तच्चिंत्यं। चक्षुः सं

प्र.मा
८४
84

योगत्वादिनाहेतुत्वस्य लाघवात्सिद्धौ फलमुखगौरवस्यादोषत्वात् । यत्तु भित्त्यादेरप्यस्तु ःसंयोगप्रतिबंधकत्वं चक्षुषोपि वा
च्यमिति वा त्वचश्च प्रतिबंधकत्वमेव युक्तमिति तत्रानन्तक्रियातन्नन्तुन्तरदेशनांतत्तत्संयोगहेतुत्वेनानतिप्रसंयोगेभि
त्त्यादेः संयोगप्रतिबंधकत्वाभावात् । स्पादेस्तु घ्राणादिकं पृथिव्यादिभ्यो भिद्यते इंद्रियत्वान्मनोवत् । मनसोपि भिद्य
ते महत्वाद्घटवत् । युक्तं चैतत् । महतः पृथिव्यादे रूपरसगंधस्पर्शविशिष्टत्वनियमात् तादृशस्य च प्रत्यक्षत्वाभावादिति
चेत्र । घ्राणं पृथिवी परकीयरसाव्यंजकत्वे सति गंधव्यंजकत्वात् कुंकुमगंधव्यंजकघृतवत् । दृष्टांतासिद्धिवारणा
यपरकीयेति । आयूपनीतसुरभिभागादेर्दृष्टांतत्वसंभवात्रोपादेयमेव वा तत् । इत्थं च रूपाव्यंजकत्वमगमोपि हेतुः न
वशरावगंधव्यंजकजलस्य स्वीयरूपव्यंजकत्वेनादोषात् । एवं रसादिमात्रव्यंजकत्वेन रसनादौ जलत्वादिकमनु
मेयमिति सिद्धांतिनः ॥ एकदेशिनस्तु अनुमानमिदमप्रयोजकं घ्राणघृतादौ रेकजात्या व्यंजकत्वं तु न युक्तिसहं ए
कतरसत्वे फलापत्तेः ॥ उक्तं चैकेनेंद्रियत्वेन जातिसाधोटासत्रिकार्यान्यतमप्रत्यासत्त्या लौकिकप्रत्यक्षत्वावच्छिन्नं हे
तुत्वं निराबाधं । न च त्वन्मते पृथिवीत्वलाघवावच्छिन्ने पृथिवीत्वादिना हेतुत्वस्य क्लृप्तत्वात् घ्राणादेः पृथिवीत्वादिकमेव
तु विधं । भौमं दिव्यमुदर्यमाकरजं चेति । भौमं भूमिभवं । काष्ठादिप्रभवं । ऊर्ध्वज्वलनस्वभावं । दिव्यम् अबिंधनं सौरवि राम ८४

युक्तं पृथिवीत्वं [illegible] त्यादिवेत्यत्र स्वविलिंगमप्यास्तावदित्याहुः ॥ रसानुमानमेव
विलिंगमकं ॥ [illegible] प्रत्यनु [illegible] पृथ्वेति नुयुक्तं विषयसूत्रं च २

घुञ्जइंधनानलरूपं।उदर्यमुदरस्थंवंधिभुक्ताहाररसादिपरिणामनिमित्तं।आकरजंसुवर्णरजतकांस्याद्यष्टकं।ननुक
नकादिकंनतैजसंशुक्लभास्वररूपशून्यत्वादितिवाच्यं।असिद्धेः।कनकादौशुक्लभास्वररूपसत्त्वात्।शुक्लत्वभास्वरत्व
योरग्रहस्त्वभिभवात्।ननुरूपमभिभूतंकनकाग्रहापत्तेः।यद्वारूपमप्यभिभूतमेवकनकादेर्ग्रहस्तुमहारजनरक्त
पटस्येवपररूपोपग्रहात्।नचांधकारेबलवत्सजातीयग्रहणाभावात्कनकरूपानभिभवेनग्रहापत्तिः।अनभिभूत
रूपवत्त्वेनोग्रहेतेजोंतरानपेक्षणादितिवाच्यं।बलवत्सजातीयसंबंधमात्रस्याभिभवस्यांधकारेपिकनकादिरूपेसत्त्वा
दितिशिवं।वायुरितरेभ्योभिद्यतेवायुत्वात्।सचस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्कारवान्।स्प
र्शोस्यानुष्णाशीतत्वेसत्यपाकजः।अत्रसगम्य।।संख्यादिकंमूर्त्तत्वादिनानुमेयं।सचायंद्विविधोणुकार्यभेदात्।तत्रका
र्यलक्षणस्त्रिविधः।शरीरमिंद्रियंविषयःप्राणश्च।तत्रशरीरमयोनिजमेवमरुतांलोकेपार्थिवावयवोपष्टंभादुपभोगस
मर्थं।इंद्रियंपृथिव्याद्यनभिभूतैर्वाय्ववयवैरारब्धंसर्वशरीरव्यापिस्पर्शग्राहकंत्वगात्मकं।विषयस्तूपलभ्यमानस्पर्शा
श्रयःस्पर्शशब्दधृतिकंपलिंगकस्तिर्यग्गमनस्वभावकः।पत्रपांशुमेघादिप्रेरणाधारणादिसमर्थः।तथाहि।अनुभूय
मानस्यस्पर्शोद्रव्याश्रितःस्पर्शत्वात्।घटस्पर्शवत्।कीचकादिध्वनिविशेषःस्पर्शवद्व्याभिघातजः।शब्दविभागाजन्यत्वे

प॰मा ८५ भूत्वान्। मेरीशाखवत्। शाखादिकंपस्ताहृशद्रव्याभियातजः वेगाघजन्यक्रियात्वात् घटादिक्रियाविशेषवत्। नभसिन्तरा
तूलस्तनयित्नुविमानादीनां धृतिः द्रव्यसंयोगप्रयोज्या। धृतिविशेषत्वात्। नौकादिधृतिवत्। धृतिः पतनाभाववद्गत्माघ
नुमानात्स्पर्शाश्रयद्रव्यसिद्धौ तत्र नीरूपत्वेन पृथिव्यादित्रिकभेदसिद्धावतिरिक्तस्य वायुसिद्धिः। अथ नीरूपत्वमसिद्धं उ
दुभूतरूपसंभवात्। पार्थिवोद्भूतस्पर्शवदुद्भूतरूपव्याप्तेरसिद्धा। अन्यथा जलानलोद्भूतस्पर्शस्य पार्थिवोद्भूतगंधादेरप्यु
द्भूतरूपव्याप्यतया वायानीतशीतोष्णसुरभिभागादेरपि द्रव्यांतरतापत्तेः। न च गुरुत्वाद्यभावात्पृथिव्यादिभेदः। असिद्धेः
पतनाभावस्तु कादाचित्कवेगवशाद्वायोः सदागतित्वेन वेगाविरामात्। अन्यथा वायूपनीतशीत [redacted] सुरभिभागा
देरपि द्रव्यांतरतापत्तेः। धर्मिकल्पनातो धर्मकल्पना लघीयसीति चेन्नु ल्पं प्रकृतेऽपि। धृतिरपि पृथिवीविशेषसंयोगा
त्। ब्रह्मांडधृतिवदीश्वरयत्नादेव वास्यात्। कंपोप्येतेन व्याख्यातः। तेजोविशेषस्यवदूर्ध्वगमनवत्पृथिवीविशेषसा
वायोस्तिर्यग्गमनमनानुपपन्नं एतेन मेघादिप्रेरणं व्याख्यातं। जठरानलवच्च पार्थिवःकश्चिद्दंतः शरीरसंचारीप्राणः
एवं त्वगपीति चेन्न। वायोः पृथिवीत्वे नुद्भूतरूपादिकल्पनापत्गौरवात्। किंचैवं च पार्थिवत्वेगंधग्राहकत्वापत्तिः पार्थि राम
वेंद्रियस्य कस्यचिदिंद्रियत्वेन तद्ग्राहकत्वात्। अपि च वायोर्गुरुत्वे वायुपूरितस्य चर्मपुटादेरपरपरणादशातोऽवनमनमनुन्मी ८५

यमानस्यस्यात्।नचधूमपूरितस्यैवा[redacted]तस्यतत्रस्यात्।अलंधूमपूरितस्यावनतिविशेषप्रतीतेः।नचालंधूमेनधू
मत्वं।धूमारब्धद्रव्यत्वेनतत्रतत्सिद्धेः।धूमत्वनियतस्यगंधविशेषस्यचस्फुटत्वे।हिमादिनियामकस्पर्शविशेषस्यचतत्रसत्त्वा
च्च।अत्यंतंधूमेनपूरितेचर्मपुटेऽवनतिरस्त्येवेत्यप्याहुः।किंचपार्थिवोद्भूतस्पर्शरूपयोरेकाग्निसंयोगसाध्यत्वान्नयोःसम
नैयत्यंपाकाधीनंतेजःसंयोगं गंधादेस्तन्नैवं।वस्त्रादौस्पर्शादिवेपिगंधाद्यनुद्भवादितिसंप्रदायः।अत्रेनव्याः।अनुद्भूतरूपादे
मानाभावान्नतत्कल्पनाप्रयुक्तगौरवंघ्राणावत्पृथिवीत्वेपिरूपाद्यभावसंभवात्।अतएवनगुरुत्वकल्पनापि।रूपाद्यभा
वस्येवगुरुत्वाभावस्यापिसंभवात्।गंधग्राहकत्वमपिघ्राणात्वेनजातिविशेषेणैव।नचतथापिसाधकाभावादेवपृथि
वीत्वाभावसिद्धिःअन्यथाजलत्वादेरप्यापत्तेरितिवाच्यं।अनुष्णाशीतस्पर्शत्वावच्छिन्नसमवायिकारणतावच्छेदकत्वेन
तत्रपृथिवीत्वसिद्धेः।गंध[redacted]समवायिकारणतावच्छेदकमपितदेव।वायौगंधानुत्पत्तिरसमवायिविरहात्।नचैवंतिर्य
गातिसमवायितावच्छेदकमपितदेवास्त्विति वायुत्वंपृथिव्यादृत्त्येवकिंनरोचयेः।तिर्यग्गमनस्यासतिप्रतिबंधकेतज्जाति
मन्मात्रेसत्त्वात्तत्रसाधारणप्रयोजकांतराकल्पनात्घटादावपितदापत्तेः।पृथिवीसंज्ञोवायुसंज्ञावेत्येतावतापत्त्या
सेपतादवस्थ्याच्च।विभागाधिक्यस्यैवासेप्यत्वात्।पार्थिवोद्भूतरूपस्पर्शयोरेकाग्निसंयोगसाध्यत्वमिमप्ययुक्तं।तयोः

प.भा ८६ ८०

नीलपीतादिक ठिनसुकुमारादिरूपतया नानाजातीयतेजस्संयोगसाध्यत्वादित्याहुः स्तदसत् । पृथिवीवायुस्पर्शसा
धारणजातिविशेषस्यासिद्धेः । शीतोष्णेतरस्पर्शत्वस्यैवानुष्णाशीतत्वात्मकत्वाच्च तत्त्वं न जन्यतावच्छेदकं । निष्पत्वादिवदा
र्थसमाजसिद्धत्वात् । न च तथापि कठिनत्वसुकुमारत्वगंधत्वाद्यवच्छिन्नसमवायितावच्छेदके नैव वायुस्पर्शनिष्ठवैजात्या
वच्छिन्ने हेतुत्वमस्तु लाघवादिति वाच्यं । तर्हि स्नेहादिसमवायितावच्छेदके नापि न हेतुतापत्तेः । नियतातिश[illegible]विशे
षादिहेतुतावच्छेदकत्वेन वायुत्वस्यापि क्लृप्तत्वान्न तथापि तिर्यग्गमनस्वभाववद्दृष्टसंयुक्तस्य वि[illegible]र्ध्वगमनस्वा
दन्यथा पत्रादेरूर्ध्वगमनानुपपत्तेरिति चेन्न । मेघसंघृष्टशकृज्जातीय विलक्षणाशकृन्नीतेन विरुद्धदिक्क्रिययोर्वायोः
संघट्टेन क्व चिदूर्ध्वगमनेऽपि स्वभावाप्रच्युतेः । वाय्वादिविशाद्दृष्टं नीनामयामिव निघगमनस्वभावानामिति दिक् ।
प्राणोऽपानः श[illegible]रीरे रसमलधातुपित्तकफादीनां प्रेरणाधारणादिहेतुः स चैक एव क्रियाभेदात् प्राणापानादिसं
ज्ञां लभते । तथा हि । मुखनासिकयोर्निः क्रमणप्रवेशात्प्राणः । मलाधोनयनादपानः । आहारेषु पाकार्थं वह्नेः
समनयनात्समानः । ऊर्ध्वनयनादुदानः । नाडीमुखेषु विनयनाद्व्यान इति शिवं । आकाशं इतरेभ्यो भिद्यते आकाश
त्वात् । आकाशत्वं च शब्दवत्त्वमुपाधिरूपम् । एवं कालत्वदिक्त्वे अपि । आकाशकालौ दिगिति सा । संज्ञाद्युपाधिकाः

दू.५

राम ८६

१८०

औपाधिकी

॥ तथा हि ॥ त्रिविधा संज्ञा पारिभाषिकी नैमित्तिकी चेति । तत्राधुनिकसंकेतशालिनी पारिभाषिकी यथा चैत्रादिः । उपाधि
प्रवृत्तिनिमित्तिका औपाधिकी । यथा पशुभूताकाशादिः । जातिप्रवृत्तिनिमित्तिका नैमित्तिकी यथा पृथिवीजलादिः
प्रवृत्तिनिमित्तं च शक्यतावच्छेदकं । आधुनिकश्चैत्रादिपदसंकेतस्तेन शक्तिमिति चैत्रत्वादिकं न प्रवृत्तिनिमित्तम
तश्चैत्रादिसंज्ञाया न नैमित्तिकत्वं । यदि च नामकरणसंस्काराधीनश्चैत्रादिपदसंकेतः शक्तिरेवेति मतं तदा तन्न
वीनाधुनिकसंकेतशालिन्येव पारिभाषिकी । तदधीनसंकेतशालिनी नैमित्तिक्येवेति वोध्यं भाष्यकृतस्तु । आकाशादिसं
ज्ञाः पारिभाषिक्य एवेत्याहुः । एतन्मते अनुगतोपाधिप्रवृत्तिनिमित्तिका संज्ञा औपाधिकी । यथा पशुभूतादिः । आका
शादिसंज्ञा तु न तथा । अनुगतप्रवृत्तिनिमित्तशून्या पारिभाषिकी यथा चैत्रमैत्रादिः आकाशादिश्चेति वोध्यं संज्ञा च
संकेतवत्प्रातिपदिकं । शतृशानजाद्यंतेषु धातुप्रत्यययोश्च संज्ञाव्यवहाराभावात् । करणाधिकरणादिशब्दास्तु संके
तिता एवं पाठकपाचकादयस्तु संकेतशून्यत्वान्न संज्ञास्तेषामपि संज्ञात्वे त्वनुगतप्रवृत्तिनिमित्तशून्यसंकेतवती
पारिभाषिकी संकेतशून्यत्वे सति यौगिकी औपाधिकी । सत्यंतं पंकजादिपदमुदाहार्यं पंकजादेर्नैमित्तिकत्वेपि औपा
धिकत्वाविरोधादनुपादेयमेव वा सत्यंतं । अनुगतप्रवृत्तिनिमित्तसंकेतवती नैमित्तिकीति वोध्यं । यत्तु प्रवृत्तिनिमित्तशू

त्मैवापरिभाषिकी। यथागगनादिः धर्मिमात्र एव गगनादिपदशक्तिरिति तत्राप्ति हि गवादिपदस्यापि धर्मिमात्र एव श
प.मा क्त्यापत्तेः। अथ यद्यद्धर्मविशिष्टयोः संबंधो गृहीतस्तत्तदेकधर्मविशिष्टज्ञानादपरधर्मविशिष्टस्य स्मृतिः। यथा ह
८७ स्तिहस्तिपकादौ पदपदार्थयोरपीयं व्यवस्था। येन च रूपेणापरामृष्टार्थस्मृतिस्तेनैव रूपेण शाब्दबोधः। न हि
87 स्मृतिर्निर्विकल्पिका। अनुभवस्मृत्योः समानप्रकारकत्वेनैव कार्यकारणभावात्। न वा निर्विकल्पकोपस्थितस्य
शाब्दानुभवप्रवेशः। आकाशादिविरहात्। तथा च गवादिपदस्य गोत्वादिविशिष्टशक्तिग्रहे विभौ न गोत्वादिनोप ना
स्थितिः। विशिष्टे शक्तिग्रहे च विशेषणेऽपि शक्तिसिद्धिरिति चेत् तुल्यं प्रकृतेऽपि। न हि आकाशादिपदादाकाशा
देर्निर्विकल्पकं स्मरणं। ततः शाब्दबोधो वा। एतेन शक्यनानात्वे तदनुगमार्थं शक्यतावच्छेदकायेत्याप्रकृतेऽनतदै
क्यमेवेत्यपास्तं। विना जसरणात् त्वकारकबोधार्थं तदवच्छिन्ने शक्तिसिद्धेः। न चाकाशादिपदा[redacted]कादाचिददृष्ट
द्रव्यभिन्नद्रव्यत्वेन कदाचित्तु शब्दाश्रयत्वेनोपस्थितिरिति नियतानुपस्थितिकत्वा शब्दाश्रयत्वादिनाकाशादिपदस्य तन्निमित्तं। न
हि गोगवयादिपदात् कदाचित् गवयगोसादृश्येन कदाचिद्गोत्वगवयत्वादिनेति गोत्वादेरप्यतथात्वापत्तेः। तत्रापि लघुगोत्वा गम
देरप्यतथात्वापत्तेः। तत्त्वेऽपि लघुगोत्वादिकमेव तथेति चेत् प्रकृतेऽपि शब्द एव तथाऽऽश्रयत्वं तु संसर्गः। शब्दः कोवारवादिर्वे २७

चेत्सर्वएवास्त्वनएवशक्यतावच्छेदकतावच्छेदकंशब्दत्वमास्थीयतोनतुकत्वस्वत्वादिकंशब्दमात्रसाधारणात्‌।शक्त्यान
त्यप्रसंगाद्वा।अथलस्यतावच्छेदकेयथानलत्वयानवास्वरूपसंवंधरूपमवच्छेदकं[illegible] त्वंकिं
तुयत्कृंमंविशिष्टेशक्यसंवंधग्रहस्तेनरूपेणोपस्थितिः शाब्दवोधस्त्वतएवचधर्मीलस्यतावच्छेदकाङ्गतुच्यते।तथाशक्यताव
च्छेदकेणत्वितिवेत्रातीरसंयोगादिरूपलक्षणायांतीरत्वादावसंभवाद्धि।शिष्टेलत्वप्रतीतावपिविशेषणांशेतत्त्या
गः।विशिष्टेशक्यत्वप्रतीत्यातु विशेषणांशेपितत्सिद्धेर्बाधकाभावाः।किंचास्कलस्यतावच्छेदकत्वस्यनियमान्नथा
शक्यतावच्छेदकत्वस्यतुनियतत्वमेवेत्यस्तिविशेषः।अपिचकोषादितएवविशिष्टेशक्तिसिद्धिः।अन्यथाशक्यैक्ये
शक्यतावच्छेदकभेदेनपर्यायभेदानुपपत्तेः।यथात्वजिगम्यादेः नानार्थत्वानुपपत्तेश्चयथार्थीदिपदस्यशक्यता
वच्छेदकत्वंस्वरूपसंवंधरूपमस्तुनतुतत्रशक्तिरितिचेन्न। शक्तेर्घटोघटपद[redacted]वोध्योभवत्वितीछाभिकायाविशे
षणात्तयाघटत्वादावपिवृत्तेः। शक्तिविशेषणत्वमेवशक्यतावच्छेदकत्वं[illegible]विशिष्टवक्तृशा
तात्वादिभानानशाब्दवोधेपितदुपस्थापकमोसदृशोगानपेडं[illegible]मार्दिसंसक्तियत्वापशाब्दवोधानुपयोगाद्दितिदिक्‌॥
॥सचशब्दसंख्यापरिमाणपृथक्त्वसंयोगविभागवान्‌।अथाकाशमानाभावः।नचात्रपर्तपक्षंअरूपिवहिर्द्रव्यत्वात्तान

मितिर

प.मा
८८

चश्च शब्दो द्रव्याश्रितो गुणत्वाद्रूपादिवदित्यनुमानात्तत्सिद्धिः। वीणावेणुमृदंगादीनां शब्दनिमित्तत्वेनाभिमतानामेव शब्दस
मवायित्वौचित्यात्तदाश्रितत्वेनोपपत्तेरिति चेन्न। शब्दो न स्पर्शवतो विशेषगुणः। अपाक[illegible]जत्वे सति अयावद्द्रव्यभावित्वा
त्। ज्ञानवत्। नात्मनः श्रोत्रग्राह्यत्वाच्छब्दत्ववत्। न दिक्कालमनसां विशेषगुणत्वादिति परिशेषादष्टद्रव्यातिरिक्तद्रव्या
श्रितत्वसिद्धेः। स चैकत्वेन नित्यत्वेन च सिद्ध्यति। निखिलशब्दानामेकाश्रितत्वे नित्याश्रितत्वे च बाधकाभावाल्लाघवाच्च। घ
टाकाशपटाकाशादिभेदव्यवहारस्त्वौपाधिक एव। स एव चादृष्टविशेषोपनिबद्धकर्णशष्कुल्यवच्छिन्नः शब्दग्राहकः श्रो
त्रव्यपदेशभाक्। तस्य सत्त्वेऽपि निबंधकादृष्टाभावाद्बाधिर्यं। न त्वेवं सर्वेषां सर्वशब्दोपलब्धिः स्यात्कर्णशष्कुल्यवच्छिन्ने
नभसि शब्दमात्रस्यैव समवायादिति चेन्न। तत्पुरुषीयकर्णशष्कुल्यवच्छिन्नशब्दस्यैव तत्पुरुषेण ग्रहणात्। न चैवं वी
णाद्यवच्छिन्नशब्दोपलब्धिर्न स्यादिति वाच्यम्। वीणाकाशसंयोगादिना हि द्रव्यावच्छेदकावच्छेदेन तज्जनिते नाद्य
शब्देन दशदिक्षु निमित्तपवनतारतम्येन कदंबगोलकन्यायेन तारमंद्रादिरूपा दश शब्दा आरभ्यंते। निमित्तप
वनातारतम्ये तु दशदिक्षु वीचीतरंगन्यायेनैकैकशब्द आरभ्यते एवं तैरपीति श्रोत्रप्राप्तिः सुघटा। न च निमि
त्तपवनस्य क्रमेणोत्तरागमनात्पूर्वदेशपवनसंयोगाच्च शब्दस्य शब्दानां चोत्पत्तिस्ततः क्रियान्तरेणोत्तरदेशपवनसं

राम
८८

दउ ए२

इत: [illegible] गे

२१

योगोस्यन्नित्सत्काल एव पूर्वशब्दनाशात्कथमुत्तरदेशनिमित्तपवनसंयोगपूर्वशब्दाभ्यां उत्तरशब्दोत्पत्तिरिति वाच्यं निमि
~~योगोस्यन्नित्सत्काल एव पूर्वशब्दनाशात्कथमुत्तरदेशनिमित्तपवनसंयोगपूर्वशब्दाभ्यां उत्तरशब्दोत्पत्तिरिति वाच्यं निमि~~
त्तपवनावयवविभागावच्छेदेनोत्तरदेशसंयोगोत्पत्तिकाले एतद्भागावच्छेदेन पूर्वदेशे पि संयोगात् एतद्भागावच्छिन्नसं
योगजशब्दाभावाच्छिन्नसंयोगाभ्यामुत्तरशब्दसमवायित्वयुक्ताद्यनिमित्तपवनसंयोगनाशोत्पत्तिकालोत्पत्तिकेनश
ब्देन स्वद्वितीयक्षणोत्तरदेशनिमित्तपवनसंयोगसहकृतेनोत्तरदेशशब्दसमवधितत्वात्तत्र शब्दीनमशब्दमात्रस्य द्वित्रिक्षणा
मात्रस्थायित्वरसनायनव्यमते शब्दस्य नैरीक्त्ववारणाय च निमित्तपवनसंयोगस्यकार्यसहभावेनैव हेतुत्वात्तो
रत्वेन निमित्तपवनविरामे शब्दविरामः । ननु कदम्बगोलकन्यायेन नानाशब्दोत्पत्तौ यः शब्दत्वयाकृतः साएवमयापीतिप्राप्त
भिन्नाकृतः । तारतमन्द्रादिभेदेन भेदस्त्वे साजात्यात् । न व्याप्तं । असमवायिकारणप्रादेशिकत्वं न विभुकार्यप्रादेशिकत्व
नियामकं ज्ञानसुखादेरणुदेशव्यापत्तेः । किन्तु निमित्तप्रादेशिकत्वमेवेति । यद्यदवच्छेदेन निमित्तपवनसंयोगस्तदव
च्छेदेन वीणासंयोगादितः एव देशशब्दोत्पत्तेः । शब्दस्य शब्दासमवायिकारणत्वे मानाभावस्यान विशेषोद्भूतपवनएववृचक
कारादिनियामकं इत्याहुः । वीणासंयोगादिविरजावपि शब्दानुवृत्तेर्नैतद्युक्तमित्यन्ये । अत्रैकदेशिनः । आकाशोनेत्य

प.मा राद्दतिरिच्यते। शब्दनिमित्तत्वेन क्लृप्तस्यैव शब्दसमवायित्वौचित्यात्। न च कार्यत्वावच्छिन्नं प्रति निमित्तकारणा
त्वं क्लृप्तं न तु शब्दत्वावच्छिन्नं प्रति समवायिकारणत्वमिति कल्प्यत्वे ध्वेर्जीवात्मन्यपि विनिगमनाविरहा[illegible] कल्पनागौ
त्या गौरवात् शब्दसमवायित्वेनातिरिक्ताकाशसिद्धिरिति वाच्यं शब्दस्य जीवो[illegible]त्माद्वा नाशस्यानपवादादित्याहुस्तदप्य
युक्तं प्रेर्यायघमियात जः शब्दः परमाणो जाय[illegible] गमत्वे ज्ञानादिवन्मानसत्वापत्तेर्ज्ञानादेश्च शब्दवच्छ्रवणत्वापत्तेः
न चादृष्टवच्छब्दादेर्मीत तसा योग्यत्वगुणेष्वीवरणत्वावच्छिन्ने च शब्दत्वेन हेतुत्वान्न ज्ञानादेः श्रावणत्वमिति वा
च्यं। अयोग्यत्वस्य प्रतिबंधकत्वे विश्रामाद्गौरवात्। अस्तु वा निमित्तपवनानामेव शब्दासमवायित्वं। करणसंयुक्त
निमित्तपवनसमवायाच्च शब्दग्रहः। निमित्तपवननाशाच्छब्दनाशः। अथ गवीणावेणुमृदंगकरणादीनां शब्दस
मवायित्वं निमित्तपवनवीणादिसंयोगस्य वापिकारणता। कर्णशष्कुलीसमवाय एव च न ग्राहकः। न चैवं सति
वीणादेः शब्दनाशो नस्यादिति वाच्यं कालिकसंबंधेन वीणादिनाशवतो वीणादिसमवेतस्य नाश एव वीणा
दिनाशस्य हेतुत्वाच्छब्दस्य कार्यशब्दादिना निमित्तपवनसंयोगनाशाद्वा नाशस्यानपवादादित्याहुः। यत्तु मेयो
घमियात जः शब्दः परमाणो जायते। ध्वाएव कादेकारणाशब्दजडइति तदसत्। परमाणुगतत्वे द्विघशब्दानां नि राम ९९

मित्तपवनसंयोगनाशाधीनतन्नाशस्यचकल्पनायांगौरवात्।अन्यथानिमित्तपवनसंयोगविरामेपिशब्दाविरामो
पपत्तेः।किंचनिमित्तपवनस्यविजातीयस्यविजातीयस्यकारणत्वंनचपरमाणौवैजात्यसंभवइतिपरमाणो
स्तदाश्रयत्वमयुक्तमितिशिवं।। ।।कालइतरेभ्योभिद्यतेकालत्वात्।कालत्वंचविभुत्वेसतिकालिकप
रत्वासमवायिकारणसंयोगाश्रयत्वाद्युपाधिरूपं।सचसंख्यापरिमाणपृथक्त्वसंयोगविभागवान्।का
ललिंगस्याविशेषादेकं।तच्चनित्यंविभुत्वाच्चव्योमवत्।सिद्धान्तेएवंदिशोपिबोध्यं।।नन्वेवंक्षणलवनिमेषकाष्ठाक
लामुहूर्तयामाहोरात्रादिव्यवहारानुपपत्तिः।क्षणत्वंहिस्ववृत्तिध्वंसप्रतियोगित्वानाधारत्वं।स्ववृत्तियावद्ध्वंस
विशिष्टसमवायत्वं।स्वस्वपूर्ववृत्तियावत्पदार्थविशिष्टसमयत्वंवालवत्वादिकंचक्षणद्वयत्वादिरूपं।नचै
तन्निरूपणएकस्मिन्संभवतिकिंतुक्षणिकातिरिक्तपदार्थविनाशपदवच्छेदकतयाघमानेवासूर्यक्रियादावपिसंभवए
कालइतिचेन्न।स्ववृत्तिध्वंसप्रतियोगित्वानाधारादिविशिष्टमहाकालस्यैवक्षणादिरूपत्वात्।अस्तुवाविशि
ष्टसूर्यक्रियादेरेवक्षणत्वं।तत्रैवंघटादेःसासादृत्संबन्धिनिसंबन्धघटकतयाकालसिद्धिः।सूर्यक्रिया

प॰मा

१०

दिसमवायिसंयुक्तकालसंयोगस्य घटादौ घटादिसंयुक्तकालसंयोगिसमवेतत्वस्य वा सूर्यक्रियादौ घटादेः सं
बंधत्वात् । नन्वस्मिन्नुत्तरो घट इत्यादिविशिष्टप्रमितिसंबंधमंतरेणासंभवत्पसंबद्धयोस्तथात्वे सर्वत्र सर्वप्रमित्या
पत्तेः ॥ एतेन विशिष्टस्याधारत्वविशेषणतया व्याधारत्वं स्वच्छेदकत्वं वा व्याप्तमिति किं विशेष्येणेति उक्तमपि न
स्तीति ॥ एतेन कालस्य लिंगमुक्तं इदानीं घट इत्यादिप्रतीतेरेव तत्त्वात् । न च कालसिद्धौ तथा प्रतीतिस्तस्याश्च
सेत्स्यतोऽन्याश्रयः ॥ पूर्वपूर्वानुमितितस्त्रयोऽप्यस्मृतिरूपकालसिद्धावुत्तप्रतीतेः संभवात् । कालसंबंधकप्र
तीतिरुक्तेन कालसिद्धिमपेक्षतेऽनुपस्थितस्यापि संबंधत्वात् । तथा सपरापरव्यतिकरयोगपद्यायौगपद्यचि
रक्षिप्रप्रत्ययलिंगः । भवति हि युवानमवधीकृत्य स्थविरे परत्वप्रत्ययः स्थविरं चावधीकृत्य यूनि परत्वप्रत्ययः ॥ सच
परत्वापरत्वलक्षणगुणविशेषाधीनः । परत्वापरत्वे च सासमवायिकारणकेऽनित्यत्वात् । तदसमवायिका
रणं च न विशेषगुणः ॥ रूपादेर्वायौ नित्ये कालिकपरत्वोपगमेऽपि न सिच्च व्यभिचारात् इत्येतदेव न गुरुत्व
नैमित्तिकद्रवत्वे । नापि संख्यादेकं । कालसंख्यादेर्घटादिपरत्वप्रागसमत्वात् । विभुगुणो विभुसंयोगस्यैव वि

राम
९०

जातीयासमवायिकारणत्वाद्वा। नच विभुगुणाएव परत्वाद्यसमवायीत्यत्र किं नियामकं। इति चेत् परत्वासमवायि
कारणाश्रयस्य लाघवकरदेकत्वनित्यत्वादिसिद्धिरिति कालपिंडसंयोग एव तथा। किंच परत्वे विप्रकृष्टत्वधीः परत्वे
सन्निकृष्टत्वधीर्निमित्तकारणं। विप्रकृष्टत्वं च तदपेक्षया बहुतरतपनपरिस्पंदान्तरितजन्मत्वं तज्जन्मस्पंदाद्यवृत्ति
सप्रतियोगिस्पंदवृत्तिजन्मवत्त्वपर्यवसन्नं। एवं सन्निकृष्टत्वमपि तथा चानित्यानां तदधिकरणकालघटितसाधिक
रणतपनस्पंदावृत्तिजन्मवत्त्वस्पंदवृत्तित्वाच्च कालघटितसंबंधेनैवेति परादिप्रत्ययलिंगत्वेनानुपपत्तेः। अत्र नित्ये कालि
कापरत्वसत्त्वेऽनन्यवृत्तेर्न निवेशः। तथापि नित्यानां कालिकसंबंधेनावृत्तित्वात्तत्र परत्वमित्यस्याकुतः। एवं च
वर्तमानादिप्रत्ययानुरोधादपि कालसिद्धिस्तथाहि वर्तमानप्रागभावप्रतियोग्यवच्छिन्नः कालो भविष्यत्कालः
वर्तमानध्वंसप्रतियोग्यवच्छिन्नोऽतीतः। वर्तमानध्वंसप्रागभावप्रतियोग्यनवच्छिन्नो वर्तमानः। कालस्य सं
बंधमात्रत्वमतेऽवच्छिन्नेति प्रथमद्वितीययोर्न देयं। एवं प्रारंभस्थितिसंहाररूपोपाधिविशिष्टत्वसृष्टिस्थितिनि
प्रलयकालव्यवहारः। स्वर्षत्रादिकमप्येवं। समाकारोपासनापरिवासितचेतसो गुरुनयस्तिहि रणगभपि

प॰भा

२९

७।

दवीमनुष्याणां प्रवृज्यंते इत्यागमात् ब्रह्मणो जीवभूतस्य ब्राह्मा वर्षशतपर्य्याप्तस्यापवर्गकाले ईश्वरस्य पवस्थ्यादिनिमित्तं गृही
तदेहो ब्रह्मादिना व्यपदिश्यते इति तैमते तु ब्रह्मणो देहत्यागकाले संसारेणाखिन्नानां प्राणिनां निशि विश्रामार्थमीश्वरसं
जिहीर्षासमकालं शरीरेंद्रियनिमित्ताखिलकर्म्मणां फलयन्निमित्तादृष्टप्रतिबंधे तत्स्वभावत एव वा वृत्तिरोधे ईश्वरेच्छाद्य
दृष्टवदात्माणुसंयोगे ईश्वरीयप्रयत्नवदात्मसंयोगजैरणुकर्मभिर्विभागद्वारा शरीरेंद्रियारंभकाणुसंयोगध्वंसे तेषामाप
रमाणवंतो विनाशः तथैव पृथिव्युदकज्वलनपवनानाम पूर्व्वके सति पृथिव्या ज्वलने सत्युदकस्य पवने सति ज्वलनस्य
पश्चात्पवनस्य च विनाशः ततः प्रविभक्ताः परमाणवो दोधूयमाना धर्माधर्मभावनानुविद्धा आत्मान आकाशा
दयश्चावतिष्ठंते तावंतमेव कालं अयमेव खंडप्रलयः। एतदुत्तरं पुनः शास्त्रोक्तक्रमेण सृष्टिः प्राणिनां भोगायेश्व
रसिसृक्षायां लब्धवृत्तिकादृष्टवदात्मसंयोगजपरमाणुकर्मभिस्तेषां परस्परसंयोगाद् द्व्यणुकादिक्रमेण महान् वा
युरुत्पन्नो नभसि दोधूयमानस्तिष्ठति। ततस्तस्मिन् वायावाप्येभ्योऽणुभ्यस्तथैव महान् सलिलराशिरुत्पन्नः पोप्लूयमानस्तिष्ठ
ति। ततस्तस्मिन्महोदधौ पार्थिवेभ्यस्तथैव महापृथिवी संहतावतिष्ठते। ततस्तस्मिन् तैजसेभ्यस्तथैवोत्पन्नो महा राम
स्तेजोराशिर्द्दीप्यमानस्तिष्ठति। एवमुत्पन्नेषु महाभूतेषु चतुर्ष्वीश्वराभिध्यानमात्रात् पार्थिवाणुसहितेभ्यस्तैजसा ९२

एतेभ्यो महदंडं सौवर्णं जायते तस्मिंश्चांडे चतुर्मुखं ब्रह्माणमुत्पाद्य प्रजासर्गे विनियुंक्ते। स चेश्वरप्रयुक्तो ऽतिशयज्ञान
वैराग्यैश्वर्यसंपन्नः प्राणिनां कर्मविपाकं ज्ञात्वा तदनुरूपज्ञानवैराग्यभोगायुषः सुतान्प्रजापतीन्मानसान्
मनुदेवर्षिपितृगणान्मुखबाहूरुपादतश्चतुरो वर्णानितराणि चोच्चावचानि भूतानि सृष्ट्वा कर्मानुरूपैर्धर्मज्ञा
नवैराग्यैश्वर्यैर्योजयति। (महाप्रलयानंतरं तु न सृष्टिः।) सर्वमुक्तौ सर्वात्मनिमित्रिमित्तस्यादृष्टस्याभावात्। (सर्वेभोक्त
प्रवृक्तौ प्रयोजनाभावाच्च। न हि बीजप्रयोजनाभ्यां विना कार्योत्पत्तिः। अथ सर्वेषां मुक्तिरेव नेष्यते इति चेन्न हि संसा
र्यैकस्वभावा एव केचिदात्मानः इति स्थितेहमपि यदि तथा स्यात्तदा मम विफलं परिव्राजकमिति शंका। या ब्रह्मच
र्यादौ कस्यापि प्रवृत्तिर्न स्यात्। न चैवमेकैकस्मिन्कल्पेप्येकैकापवृक्तेपि नतरां संसारोच्छित्तिः संसारः स्यात्कल्पानाम
नंतत्वादिति चेत्सत्यमनंतानामप्यपवृक्तानां तु सर्वसंप्रति संसारस्यानुभविकत्वादिति दिक्। ब्रह्मप्रलयत्वं च स्वसमद्ध
व्यानधिकरणद्रव्यप्रागभावाधिकरणकालत्वं। सृष्टिकालत्वं वा प्रागभावानधिकरणत्वं। महाप्रलयो यावत्स्मरणादिवा
रणाद्याधिकरणानं। न तु प्रलये रोध्यमानाः परमाणवस्तिष्ठंतीति भाष्यविरुद्धा। तत्र क्रियासद्भावे मानाभा
वात्। स्मरणादिव्यवहारस्य वर्षादिव्यवहारवद्गौणत्वात्। अन्यथा प्रलयस्य ब्रह्मशतवर्षनियमायस्मृत्यादिस

प॰मा त्वापत्तेः। कालव्यवहारस्तु ध्वंसादिना। पूर्वसर्गीयादृष्टवदात्मसंयोगादितश्चोपपद्यते। तत एव च परसर्गीयाद्यद्व्यणुका
नुकूलपरमाणुक्रियापीति चेन्नादृष्टवदात्मसंयोगस्य सतः प्रागपि क्रियोत्पत्तौ। बाधकाभावात्। द्वितीयसृष्टिप्राक्स
त्ताः सहकारीति चेन्न। सर्गक्रियास्वीकार एव सम्भवात्। तदुक्तमाचार्यैः। क्रियासंतानास्वीकालावच्छेदानुपपत्तौ पु
नः सर्गानुपपत्तिरिति क्रियासंतानस्वीकार एव यावद्भिः संवत्सरैर्ब्रह्मवर्षशतं तावत्सु तेषां समाप्त्यपरसृष्टिसंभव इति न
दाशयः। किं च परमाणुगुरुत्वाद्यधीनक्रियासंतानो दुर्वार एव चाविघ्नासहितं ब्रह्मैव प्रलयेऽतिष्ठतीति नष्टकार्यमात्र
मिति वेदान्तिमतं चिन्त्यम्। वस्तुतस्तु ईश्वरपि तदा मायापरिणामास्वीकियतइति दिक्। प्रलये परमाणवश्च सन्तिरेव लाघ
वतर्कसहकृतेनेति संक्षेपः। महाप्रलयत्वं च ग्राधानधिकरणकालत्वं। तच्च महाप्रलयादौ निखिलपरमाणुक्रियावि
भागसंयोगनाशैर्निखिलद्व्यणुकनाशे तद्गुणानां त्र्यणुकानां च नाशः। एवं घटतद्गुणापर्यन्तानामपीति नैयायि
कः पन्थाः। अत्रेदं बोध्यम् आश्रयनाशे आश्रयादिनाशस्यापि विशिष्यैव हेतुत्वात् चरमभोगनाश्यादृष्टनाशात् युगपदे
व तत्कालीननिखिलवेभाववधार्यनाशोक्तः। इदं तु च नाशस्यैक्यात् लाघवमपि। नैवदिद्रियमायाश्रयनाशो हे
तुरावश्यकः। तन्नत्वगति योगिनाकारणत्वेनापि तन्नियमोपपत्तेः। वस्तुतस्तु दादिद्रव्यमेव नास्ति तदोदयाचका राम २०२

घभावेन प्राच्यादिदिशाएवाभावान्नाएतेन सर्वेषां क्लृप्तनाशकादेवनाशः। चरमध्वाणुकनाशानुगुणपरमाणु
क्रियायाजन्मद्रव्यरूपान्तरदेशसंयोगादस्य चाश्रयनाशात्राशादिरूपापत्तेः नीहृशक्रियाया गगनादिनापिप
रमाणुसंयोगजननसंभवेनतेनयोगनाशानुपपत्तेश्चवक्तनत्वस्मदादीयहृष्टवदात्मसंयोगेः श्यत्नवद्वीश्वरस
योगेश्च युगपदेवदेहेंद्रियविषयावयवेषु क्रियास्ताभिर्विभागद्वारारंभकसंयोगनाशस्तेनेश्वरमनुक्तिप्रतियो
गिद्रुःखसाक्षात्कारकाले युगपदेवदेहेंद्रिय[illegible]षावयवेषु क्रियास्ताभिर्विभागद्वारारंभकसंयोग[illegible] दि
विनाशोद्रव्यनाशेसमवायिकारणनाशस्यहेतुत्वान्नतस्तदाश्रितगुणादिनाशोऽदृष्टनाशश्चानतोऽदृ
ष्टनाशात्परमाणवाकाशादिसंयोगचरमद्रुःखसाक्षात्कारनतज्जनकात्ममनोयोगानांनाशः। चरमद्रुःखसा
क्षात्कारस्योपेक्षात्वान्नतज्जन्यसंस्कारकल्पनस्वप्रतियोगिसमवेतत्वकालिकोभयसंबंधेननाशविशिष्टनाशे
नाशत्वेनहेतुत्वाच्चनविशिष्याश्रयनाशहेतुत्वकल्पनाप्रयुक्तगौरवमितिनत्वादिगितरेभ्योभिद्यतेदिक्त्वान्न
दिक्त्वंचविभुत्वेसतिदैशिकपरत्वासमवायिकारणसंयोगाश्रयत्वाद्युपाधिरूपमाचसाचसंख्यापरिमाण
पृथक्त्वसंयोगविभागवतीननुदिशिमानाभावः। अरूपिद्रव्येहिद्रव्यात्वेनाप्रत्यक्षत्वादनुमानादेश्वा प्रयोज्ञ

प.मा ९३ कत्वादिति चेन्न। प्राच्यां घट इत्यादिव्यवहारबलादुदयाचलसंयोगादिलक्षणप्राच्यादेर्घटादिना संबंधघटकत्वेन न दिक्सिद्धिः। का
लस्तु नियतक्रियासंबंधघटक एवेति मतम्। तस्य प्राच्यादिसंबंधघटकता। नाप्याकाशात्मनोः तथातिप्रसंगात्। मूर्त्तानां तु
न संबंधघटकतासंभवः। घटादिसंयुक्तमूर्त्तसंयोगित्वस्यानियमतः सूर्यादावसत्वात्। स्वसंयुक्तसंयोगिवृत्तित्वादेरेव सं
बंधत्वादस्ति हि घटादिसंयुक्तदिक्संयोगिवृत्तित्वं प्राच्यादौ रूपादेः स्वाश्रयसंयुक्तसंयोगिवृत्तित्वादिकं शब्दादेः स्वाश्र
यसंयुक्तसंयुक्तसंयोगिवृत्तित्वादिकं वा प्राच्यामिति विशेषणतया। सा च तत्तद्दिक्स्थिततत्तत्पदार्थानामेव संबंधतया धर्मिग्रा
हकमानसिद्धेति नातिप्रसंगः। ननु चैत्रस्य प्राच्यां घट इत्यादेश्चैत्रापेक्षया स्वसंनिहितोदयाचलसंयोगादिवृत्ति
त्वमर्थ इति मते स्वकृदयाचलादिसंयोगसंबंधघटकतया दिक्सिद्धिः। यदा तु चैत्रापेक्षयोदयाचलसन्निहितादिवृत्ति
त्वं तदर्थ इति मतं तदा किमतिरिक्तदिशा कल्पनेन संयोगसमवायादिरूपेणासन्निहितत्वेनेष्टसंबंधेनैव निर्वाहात् तत्र च घ
टत्वं पादिकं प्राच्यामित्यादावेकविधः संबंधस्तु विनता न वापि तत्तत्सर्वं धनेदा इतरेषु घटपृथिवीत्वादिकमित्यत्रैव सं
बंधभेदेप्यसंतोषात्। अत्र ब्रूमः। अस्तूदयाचलादिसन्निहितादिकं प्राच्यादिपदार्थः तेन तत्कृतस्य संबंधेन व्यवहारोपपत्तीव्यादि
वर्त्तिज्ञानादावपि प्राच्यामित्यादिव्यवहारापत्तिः। विषयतादिसंबंधस्य ज्ञानानंतकालत एव तत्रापि संबंधोस्त्यत्र स्यादि राम ९३

ष्टो घटः अस्मिन् काले घट इत्यादिप्रतीतौ वैलक्षण्यं तु जन्यत्वमूर्त्तत्वरूपयोः कालदिशोर्द्वयरूपयोर्वा कालत्वदिक्त्व
योः प्रकारयोर्वैलक्षण्यादिति वाच्यं । जन्यमात्रस्य कालतया प्रतीत्यादि दिग्वर्त्तिधर्मप्रत्यापत्तिस्तादिग्व्यवहारापत्तेः । न
च मूर्त्तमात्रस्य दिगुपाधितया प्रतीच्यां घटेऽस्मादित्यादिप्रतीतौ तद्विषयजन्यमूर्त्तमेव प्रतीच्यादिवर्त्तिविशेष्यकेदानीमिति प्र
तीतिविषयोऽस्तीति वाच्यं । यस्मिन्नेव काले प्राच्यां घटस्तस्मिन्नेव काले प्रतीच्यां पट इति व्यवहारानापत्तेरिति दिक् । अ
त्र तदपेक्षयोदयाचलसन्निहिता दिक् तत्तत्प्राची । अस्ताचलसन्निहिता प्रतीची । सुमेरुसन्निहितोदीची । तदसन्निहि
ता दक्षिणा । यत्तु प्रागभिमुखचैत्रादेर्वामापेक्षया दक्षिणभागसन्निहिता दक्षिणा । दक्षिणापेक्षया वामभागसन्नि
हितोत्तरा । वामत्वदक्षिणत्वे जातिविशेषाविति तन्न । घटादेर्वामत्वघभावात् । तत्तदपेक्षयोदयाचलादिसन्निहितत्वं
च तत्तन्निष्ठोदयाचलादिसंयुक्तसंयोगापेक्षया अल्पतरोदयाचलादिसंयुक्तसंयोगशालित्वं । उक्तं च प्रयागापेक्षया प्राच्यां का
शी । तत्र प्रयागनिष्ठोदयाचलसंयुक्तसंयोगपर्याप्तसंख्याव्याप्यसंख्यापर्याप्त्यधिकरणोदयाचलसंयुक्तसंयोग
शालिमूर्त्तवृत्तिः काशीत्ययं च बोधः । तत्र प्राथमिकसंख्यातत्पंचम्यंतस्य व्याप्येत्यादिमूर्त्तनीति प्राचीत्यस्य निष्ठांतमे
व पापचम्यंतस्योदयाचलेत्यादि मूर्त्तांतं प्राचीत्यस्य खंडशः शक्यार्थः । [illegible] न तत्तन्निष्ठोदयाचलसंयुक्तसंयोगपर्य

प॰मा॰ ६७
रात्वटकं मूर्त्तत्वं ततः प्राचीत्यादिव्यवहारासांनिध्यादिसंबंधेनोदयाचलादिविशिष्टमूर्त्तं प्राच्यपीत्युक्तं च संयुक्तसंयोगप
रंपराज्ञानं विना पिप्राच्यादिबुद्धिर्नानुपपन्ना। संसर्गोपस्थितेः प्रागत एव तत्र उदयाचलसंनिद्दिनाद्यपेक्षया लाघवा
दुदयाचलसांनिध्यादेरत्यतत्संयुक्तसंबंधेनोदयाचलादिविशिष्टसंयोगस्यैवादिक्त्वं न तु मूर्त्तमात्रस्येति हृदयुक्तः
पंथाः। अथ तथाप्युदयाचलादिज्ञानविरहिणाः कथं प्राच्यादिव्यवहार इति चेन्न संकेतग्रहमात्रात्। अत्र दीधितिकृतः॥ दि
१५ क्कालौ नेश्वरादतिरिच्येते मानाभावात्। न त्र त्व कालोपाधिदिगुपाधिविशिष्टादीश्वरादेव सर्वकालवप्राच्यादिव्यवहारो
पपत्तेरित्याहुस्तच्चिंत्यं। जीवात्मनामपि प्रत्येकं विनिगमकाभावेन दिक्कालोभयात्वापत्तेः। न चैतेषां दिक्कालत्वे कार्यमात्र
जनकत्वपरत्वापरत्वजनकत्वं च कल्प्यमीश्वरस्य तु तत्क्लृप्तमेवेति वाच्यं। संबंधभूतयोर्द्दिक्कालयोः कार्यमात्रजनक
त्वाकल्पनात्। दिक्कालोयाधीनामेव तत्त्वात्। विप्रकृष्टत्वसन्निकृष्टत्वाभ्यामेव परत्वापरत्वव्यवहारोपपत्तेः। तयो
रतिरिक्तत्वे मानाभावात्। किंच संबंधतयैव दिक्कालयोः साधनात्तयोरेकत्वे प्रतीच्यादिदिग्व्यवहारे प्राच्यामित्यादिव्य
वहारापत्तिरिति न किंचिदेतत्। यस्मिन्काले घटोस्यां दिशि पट इत्यादिप्रतीतेर्द्दिक्कालांशे वैलक्षण्यस्यानुगतत्वस्य वा राम
नुभविकत्वात्तयोर्भेदस्यैकैकत्वं चात एव जगदाधारता। सर्वकालवप्राच्यादेरूपता च तत्तद्दिक्कालोपाध्यवच्छिन्नयो ६७

स्योस्तयोरेवेति तत्रा जन्यत्वमूर्त्तत्वरूपोपाधिद्वयविषयकत्वेनैव वैलक्षण्यादिसंभवेन तयोर्मानाभावात् । इदं तु चिंत्यं । संबंधतया
सिद्धयोर्दिक्कालयोः समवायवत्त्वद्रव्यत्वगुणवत्त्वयोर्मानाभाव इति दिक् । आत्मा इतरेभ्यो भिद्यते आत्मत्वात् । आत्मत्वं जातिविशे
षः । नात्र मानाभावः । ज्ञानवत्त्वादिनात्मव्यवहारोपपत्तेः । नत्वत्रानुगतप्रत्ययाभावात् एकपुरुषस्य नानात्मग्रहाभावादिति चेन्न । जन्य
ज्ञानेच्छादिसुखादिसमवायिकारणतानवच्छेदकत्वेनात्मत्वजातिसिद्धेः अन्यथा मनस्यपि ज्ञानाद्युत्पत्त्यापत्तेः । न च सामा
न्यकार्यकारणभावे मानाभावः । विशेषकार्यकारणभावस्यावश्यकत्वात् अन्यथा तत्पुरुषीयज्ञानादीनां तत्पुरुषात्मकत्व
नस्यादिति वाच्यं । व्यक्तिस्थानीयापत्तेरभावात् । न चैवमपि ईश्वरात्मनि कथं तत्सिद्धिः । प्रस्तुत तत्रात्मत्वे प्रत्यक्षमनुमितसाधारणप
त्तिः । उपनयपरामर्षादिसत्त्वादिति वाच्यं । जन्यज्ञानादिनुतावच्छेदकत्वेन सिद्धाया जातेरेव लाघवेनात्मपदप्रवृत्तिनिमित्तत्वा
दात्मपदगर्भस्य तैव तत्रात्मत्वसिद्धेः । मुख्ये बाधकं विना गौणत्वायोगात् । ईश्वरे जन्यज्ञानाद्यनुत्पादस्तु जन्यसविषयकमा
त्रहेतोर्विजातीयात्ममनोयोगस्याभावात् । धर्माधर्मानुत्पादस्तु तज्जनकस्य मिथ्याज्ञानवासनाविरहादिति दिक् । स चायं द्वि
विधः । जीवेश्वरभेदात् । तत्र जीवः कर्ता भोक्ता । संख्यापरिमाणपृथक्त्वसंयोगविभागबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माध
र्मसंस्कारात्मकचतुर्दशगुणवान् । संख्यादयो विभागान्ताः पञ्च व्याप्त्वा सिद्धाः । आत्मैकत्वपरिमाणे ज्ञानादयः प्रत्यक्षा नाश्च प

प.मा. ९५ 95

त्यज्ञानात्। आत्मैकत्वपरिमाणो न प्रत्यक्षेणेति त्रुटीकाक्रान्तः। धर्माधर्मौ सुखदुःखहेतुत्वात्। संस्कारो भवनाख्यः स्मृतिहेतुत्वात्।
यागज्ञानादेराशुतरविनाशिनः कालांतरभाविस्वर्गस्मृत्यादिरूपफलजनकत्वस्य फलपर्यन्तस्थायिव्यापारं विना संभवात्। जी
वाश्चानंताः एकदा विज्ञत्वविज्ञत्वसुखित्वदुःखित्वमुक्तत्वसंसारित्वादिविरुद्धधर्मसमावेशात्। एते च नित्यज्ञानवन्तः भ्रमप्रमा
दिदर्शनात्। नन्विदमयुक्तम् अत्यगस्थूलो च चुरखाणो मनोऽप्यकर्त्ता चैतन्यचिन्मात्रस्य दृष्टिमात्रदिष्कृतेः परमार्थतो निर्द्धर्मकस्या
विद्यया कर्तृत्वादिमतः परमानंदबोधस्वरूपस्य जीवत्वात्। ज्ञानेच्छासुखदुःखे[illegible]दीनामन्तःकरणाश्रितत्वात्। कामः संकल्पो
विचिकित्साश्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरेतत्सर्वं मन एवेति श्रुतेरिति वेदान्तिमतस्य प्रामाणिकत्वादिति चेन्न। अहं ज्ञा
नाम्यहं सुखी दुःखीत्यादिप्रतीतेरहंकारास्पदस्यात्मन एव ज्ञानाद्याश्रयत्वात्। न चान्तःकरणतादात्म्याध्यासादन्तः
तःकरणधर्मज्ञानाद्यारोपः। तैरन्यथाख्यात्यस्वीकारादात्मन्यनिर्वचनीयज्ञानाद्यन्तरस्वीकारे तेषामेव स्वीकारौचित्यात्।
अयोदहतीत्यादावयसि वह्निधर्मवन्न च परंपरयान्तःकरणधर्मा एव प्रतीयन्ते। सान्यादेव वासस्त्रिकर्षसत्त्वेऽन्यथाख्यातेरपि स्वी
कारात्तदिमपिमंदं। सा सांसर्गेवधेन ज्ञानादिमत्ताप्रतीतेरनुभवसिद्धाया बाधकं विना भ्रमत्वायोगात्। ज्ञानादिकं साधिक
रणमिमाल्लाघवात् ज्ञानाद्यधिकरणस्यानित्यत्वसिद्धेश्च तन्मतेऽनमानामनंतानां तःकरणानां प्रागभावध्वंसादिकल्पनेश्च राम. ९५

त्तिगौरवात्। मन एवेतीत्यत्र मनःकारणकेलत्तणावश्यकी न त्वुपादानोपादेययोरभेदो यो क्लिक इति नैयायिकाः। तथा
चक्षुरितिः। अन्ये तु तरञ्जात्मो न तरञ्जा आत्मा नट्टमय इति भाभाकराः। अप्येवं। एतेन सांख्यमतमप्यपास्तं। एवं हि मते जीवो मो
क्षैकेवकेवलबोधात्मकः। बुद्धिस्तत्वप्रकृतिपरिणामविशेषरूपमहत्तत्वापरनामकं। सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्म
भावनात्मकभावाष्टकशालि पुरुषस्यजन्यधर्मानाश्रयत्वरूपकूटस्थत्वक्षतेः। सुखाद्यनाश्रयत्वात्। ज्ञानं तु बुद्धि
निष्ठो बुद्धिपरिणामविशेषो घटाकारादिरूपो न्यपरनामा त्रिगुणात्मकबुद्धेः सत्वगुणोद्रेकरूपः ज्ञानत्वेन त्वमेते
इच्छाद्यन्यसविषयकत्वेन तु चेतनात्वचेतनायाः पुरुषधर्मत्वेन नित्यत्वेन च सर्यंपि बुद्धिधर्मज्ञानानात्मकत्वात्। उ
पलब्धिस्तु बुद्धिनिष्ठाज्ञानात्मकवृत्तौ दर्पणादिवस्वच्छायां चैतन्यप्रतिबिंब इति नौ। तदुक्तं। चेतनासुखाद्योः सामानाधि
करण्यानुभवात् पुरुषस्यैव सुखादिमत्वात्। कूटस्थत्वं तु नित्यत्वमनात्मेतरत्वं वा ज्ञानमपि न चेतनाभिन्नं न वा दृष्टौ
चेतनाप्रतिबिंबः वृत्तेरेव चेतनात्मकत्वात्। तथा च बुद्ध्युपलब्धिज्ञानानां भेदकल्पनाप्यप्रामाणिकी। तथा चाऽस्मपा
दसूत्रं बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरमिति। एतेन ज्ञानो नाज्ञानरूप आत्मा ज्ञानं जडद्रव्यरूपं सुषुप्तावि द्विया
दिव्यापारोपरमात्। सुषुप्तिप्रकाशास्वीकारे सुखमहमस्वाप्समिति स्थितस्य परामर्शेन रूप आत्मा ज्ञानं जडं द्र

पं॰मा यरूपंस्तु बुद्ध्यादिंद्रियादिष्वात्मारोपरमात्मा [redacted] रेत्वमहमस्वाप्सामिति सुषुप्तिस्तत्परामर्षे विषया त्मान

त्वविद्याप्रकाशिका जडत्वादस्त्यात्मैवबोधांशः प्रकाशकः सिद्धः न किंचिदवेदिषमिति परामर्षाद्विशेषविज्ञानाभा

९८ ववत्त्वमपि कल्प्यते इत्यप्रकाशोऽव्यंशोपि सिद्धः जाग्रदवस्थायामपि मामहं न जानामीत्यात्मनिकर्तरि भासमानेपि

मां न जानामीति भानाद्विरूपते ति महत्त्मनोऽज्ञत्वोक्तए वजीवड़ति पातंजलमतव्याख्यानात् न च नित्यविज्ञानमानंदव

ह्मेति श्रुतिर्वेदांतिमतपक्षपाति नीविज्ञानपदस्य विजानातीति कर्तृव्युत्पत्त्या विज्ञानाश्रयपरत्वादानंदमिति सप्तास्य

श्र र्थीत्वे प्रियान्नस्यानंदाश्रयवोधकत्वात् अन्यथाऽनंदमिति नपुंसकत्वानुपपत्तेः पत्न्याद्यपेक्षयापि स्वपुत्रे प्रियत्वदर्श

नादात्मत्वेनैतत् प्रियत्वमरणात् पुत्रे नष्टे पुष्टेऽहमेवन एवाहमेवनष्टः पुष्ट इत्यनुभवादात्मा वै पुत्रनामासीति श्रु

तेश्च पुत्रएवात्मेत्यतिप्राकृत अपुत्रं विनाप्यहं जानामीत्यादिप्रत्ययात्स्वदीप्तगृहात्स्वपुत्रं त्यक्त्वापि स्वस्यनिर्गमना

त् गौरोहं जानामि स्थूलोहं जानामीत्यादिगौरत्वज्ञानादिसामानाधिकरण्यप्रतीत्या स चा एष पुरुषोन्नरसम

य इत्यादिश्रुतेश्च स्थूलशरीरमेवात्मेत्येकश्चार्वाको लोकायतनामा परस्त्विंद्रियाणामात्मत्वापादानाद्वा पर मेसमपि दे

हे चलनादेश्चेतनधर्मस्याभावात्कारणोहं वधिरोहमित्याद्यनुभवात् ते ह प्राणाः प्रजापतिमेत्य ब्रुवन्निति श्रुतेश्चै राम ९६

यारोपवात्मा गौणस्याप्याकृत्माइाणपदवोध्यानामिंद्रियाणामचैतन्ये प्रश्नप्रणायनानुपपत्तेरित्याह । परस्तु प्राणाभा
वेंद्रियादेरपिचलनाभावात् इंद्रियाणामिंधिनानंतज्ञानाद्याश्रयत्वं चक्षुरादिस्मिन्नस्याप्यित्वाच्चादिदर्शनात् । च चक्षु
श्चाक्षुषस्पर्शत्वगादित्वाचादेरधिकरणो वा च्यात यश्चयोहं स्पृष्ट्वा मिसोहं पश्यामीतिप्रतीत्यनुपपत्तेः । चक्षुषा दृष्टस्य वस्तु
नश्च त्वक्तु नी शेषेन स्मरणानुपपत्तेः । अहमशनायावानहं पिपासावानित्यशनायापिपासयोः प्राणधर्मयोरह
मास्पदे प्रतीतेरन्योंतरआत्मा प्राणमयइत्यादिश्रुतेश्च मुख्यः प्राण एवात्मेत्याह । अन्यस्तु मनसि निर्व्यापारे प्राणा
देरकिंचित्करत्वात् अहं संकल्पवानहं विकल्पवानित्यनुभवात् अन्योंतर आत्मा मनोमय इति श्रुतेश्च मन आत्मेत्या
ह । देहेंद्रियातिरिक्तो देहपरिमाण आत्मेति दिगंबरः । सौगतस्तु मनसः कर्तृत्वे सर्वैरिंद्रियैरधिष्ठितत्वेन युगपत्त्रिचि सै
न्तत्वाद्युगपत्राणाद्यज्ञानोत्पत्तिः स्यादिति मनोभिन्नं क्षणिकविज्ञानमेव कर्त्री मनस्तु ज्ञानक्रमहेतुः करणं तथा च श्रु
तिरन्योंतर आत्मा विज्ञानमय इत्याह । माध्यमिकस्तु सुषुप्तौ सर्वाभावाद् अहं सुषुप्तौ नासमित्युत्थितस्यानुभवाच्च शू
न्यं सर्वाभावरूपमात्मा तथा च श्रुतिः । इदमग्र आसीदिति इदं नामरूपात्मकं जगदग्रे सृष्टेः प्राक्काले सच्छून्यमेवासी
दित्यर्थ इत्याह । तत्र सर्वत्र श्रुतियुक्तीनामुत्तरोत्तरश्रुतियुक्तिबाधितत्वात् पुत्रादीनामनात्मत्वं स्फुटं किं च आत्मा

[illegible]सर

प.मा वैपुत्रनामासीतिश्रुतेः आयुक्तपक्षे त्वाबाधः अत्यक्तं हि सर्वान्तरत्वं। शरीरमात्मेत्यादेरस्थूलद्वित्यादिना बाधः सदित्यनेन

९७ लौकिकविज्ञानस्य शून्यस्य चात्मत्वमुदासः। सर्वदा सदित्यर्थान्तान्तथा चक्षुत्यन्तरानिसवापषमहान् जआत्मा। कश्चिद्धीरः प्र

त्यगात्मानमैक्षत अस्थूलमनएवह्रस्वमदीर्घमच रूक्षश्रोत्रं तदपाणिपादमित्यादिना च प्रत्यगस्थूलद्वित्यादिश्रुतानावकत्रीचै

तन्यचिन्मात्रमिति न्यायमनविरुद्धं। अकर्तृत्वस्य रघुनन्दईषदर्थे तथेश्वरभेदपरत्वाद्वैतन्यमिति धेर्मिपरमित्यलं पुष्ठिक्रियाव

श्रुतिगवेषणायायजमानः प्रस्तरइत्यादिवद्गौणात्वतापिमोक्षिकार्थपरत्वाल्लुतेरितिपुत्रदेहादिकमनित्यं नात्मा कर्म

हानाकृताभ्यागमप्रसंगात्। तथाहि प्राग्जन्मगृहीतदेहादिनाशेन तत्कृतजन्मनिकृतानामदृष्टानां नाशेपरजन्मनि भोगान्य

थानुपपत्त्याऽकृतानां तेषां कल्पनापत्तिः। किंचबालस्य स्तनपानादौ प्रवृत्तिरिष्टसाधनताधीसाध्यासा च धीस्तस्य स्म

तिरूपैव वाच्या। स्मृतिश्च समानाधिकरणानुभवसाध्येति पूर्वजन्मन्यनुभवाश्रयस्यैव परजन्मनि स्मरणं एवं तत्रपू

र्वजन्मन्यपीत्यनादित्वमात्मनः सिद्धं। अनादेर्भावस्य न नाशइत्यनादिनिधनत्वमनपवादं। मनोनित्यमात्मेतित्वनयुक्तं

तस्याणुत्वसुखादेरण्वेदेशतापत्तेः। विभुत्वं तु प्रागेव निराकृतं ज्ञानमात्रेविवादापत्तिश्च। अपकृष्टमहत्त्वेत्वे तु साव

यवत्वादनित्यत्वानिपत्त। अपिचाहं सुखी दुःखीत्याद्यपरोक्षज्ञानं सर्वजनसिद्धं न च मनसो देहादेर्वा तत्संभवः मनसः राम

९७

१५ अथ तदनुमितं तत्त्वालोनोचितं लौकिकप्रत्यक्षसंभवः इत्यलौकिकप्रत्यक्षेकृप
१ स्यज्ञानियवक्षे नहेतुत्वोविप्रायात् न वा पप्रसिद्धातः ४१

सुखाद्याश्रयत्वेक कर्तृत्वेन करणत्वाभावेन करणाभावात्तथात्वेन्द्रियप्रसिद्धान्तः ॐ इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो
लिङ्गमिति न्यायसूत्रात् । उक्तं चात्र भाष्यकृता । न चात्मानो वयमप्रत्यक्षतो न गृह्यन्ते इति प्रशस्तपादभाष्येऽपि तस्य सौक्ष्म्या
दप्रत्यक्षत्वेपि करणैः शब्दाद्युपलब्ध्यानुमितैः श्रोत्रादिभिः समभिगमः क्रियते वास्यादीनां करणानां कर्तृप्रयोज्यत्व
दर्शनादित्युक्तम् । उक्तं च न्यायरत्ने प्रत्यक्षत्वरूपवत्त्वस्पर्शवत्त्वानीति अन्यत्रात्मा योगिप्रत्यक्षमध्यक्ष एवातो गृहीत इति वे
न्नात्तादृशानुमितिसामग्रीविधुराणाम लौकिकप्रमाणानामहं जानामीत्यादिप्रतीतिस्तादृशव्याप्त्यादिप्रतिसंधा
नकल्पने गौरवादात्मत्वविशिष्टस्यायोग्यत्वे पक्षधर्मतासिद्ध्यानुमानासंभवाच्च तद्योग्यत्वस्यैव न्याय्यत्वात् । अत एव वा
र्त्तिककारादिभिरात्मनः प्रत्यक्षत्वमङ्गीकृतम् । व्याख्यातं च सूत्रादिकमन्यथेति दिक् । ईश्वरस्तु कर्तैव संख्यापरिमाण
पृथक्त्वसंयोगविभागबुद्धीच्छाप्रयत्नात्मकगुणाष्टकवान् बुद्धीच्छाप्रयत्ना नित्याः सर्वविषयकाश्च । अयमेक एव
ब्रह्मविष्णुशिवादिशरीरावच्छिन्नः सृष्टिस्थितिप्रलयकारी । द्विविधोऽप्यात्मानादिनिधनो विभुश्च । ननु ईश्वरे किं मा
नं । न तावत्प्रत्यक्षं रूपिद्रव्यत्वेन चक्षुरिन्द्रियाप्रत्यक्षत्वात् । परात्मनः परमनोग्राह्यत्वाभावेन मानसत्वाभावान्
च विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात् । संबाहुभ्यां धमति संपतत्रैर्द्यावाभूमी जनयन्देव एक इ

प.मा ९८ त्यादिक्षितिर्मानां अर्थवादत्वात्।नन्वीश्वरमुपासीतेत्यादिविधिशेषीभूतानां सर्वज्ञत्वात्मत्वादिबोधः स्वतंत्रतानित्यम
महत्त्वशक्तिः अनंतशक्तिश्च विभोर्विधिज्ञाः षडाहुरंगानि महेश्वरस्येत्यादिश्रुतिस्तथा स्मृतिरागमाएप किंतिपत्रान्म
तिश्रुतेरकिंचित्करत्वादिति चेन्नैवं।कार्यं सकर्तृकं कार्यत्वादित्याद्यनुमानेन तत्सिद्धेः।न चात्र पक्षतावच्छेदकहानिसा
ध्यत्वरूपकार्यत्वे चेत्सिद्धसाधनमिति वाच्यं।प्रागभावप्रतियोगित्वे सति सत्त्वस्य तत्त्वात्।पक्षतावच्छेदकावच्छेदेन साध्य
सिद्धेरुद्देश्यत्वात् घटादिरूपकार्यस्य सकर्तृकत्वसिद्ध्यांशतः सिद्धसाधने।अथात्र शरीरजन्यत्वमुपाधिः अंकुरादौ सा
ध्यव्यापकत्वसंदेहेपि संदिग्धोपाधित्वं दुर्वारं तथा च तद्दाहितव्यभिचारसंशयसत्त्वात्कथमनुमानं लाघवाद्व्यभिचा
रज्ञानत्वेनैव विरोधित्वात्पक्षेतत्समयोरपि व्यभिचारसंशयस्य विरोधित्वादिति चेन्न।प्रकृते कार्यत्वावच्छिन्नप्रति
कर्तृत्वेन कारणत्वनिश्चयात् लाघवतर्कविनारे व्यभिचारसंशयस्याविरोधित्वात्।अत एवानुकूलतर्कानवतार ए
व व्यभिचारसंशयाधायकः संदिग्धोपाधिर्दोष इति दिक्।अथ सकर्तृकत्वसाध्ये समवायादिना सिद्धसाधनमर्थान्त
रत्वाज्ञानादेरेव जनकतया कृतेरजनकत्वाद्बाधश्चेति चेन्न समवायत्वसजन्यत्वेव — जन्यत्वादेः साध्यतायामदोषा राम ९८
त्।अदृष्टद्वारा जन्यत्वस्याविशेषणतासंबंधावच्छिन्नकारणताप्रतियोगिकसमवायावच्छिन्नजन्यत्वस्य वा साध्यत्वा

ज्ञानसंसर्गेतरीयादृष्टजनकात्मत्वादिज्ञानजन्यत्वेन सिद्धसाधनमर्थान्तरं वा संसर्गीयस्थकालीनं द्व्यंज्ञानवृक्तार्यत्वादित्यादिरू
पंचानुमानं प्रसूतावच्छेदककालावच्छेदेन साध्यसिद्धिरिति तन्न। अथ तत्तन्तुरूपीयपटाद्यपि प्रवृत्तिं स्तन्वेन तन्न तन्तुरूपीयघ
टादिसाधनमहत्त्वप्रकारकोपादानप्रत्यक्षत्वेन हेतुत्वात् कार्यत्वावच्छिन्ने प्रत्यक्षत्वे न हेतुत्वे मानाभावः। चिकीर्षापि प्रवृत्त्यैव
हेतुरिति नेच्छात्वेनापि तथा। नापि कृतित्वेन घटत्वाद्यवच्छिन्नं प्रत्येव विलक्षणानां कृतित्वेन हेतुत्वादिति चेत्। प्रत्यक्षता वि
वयघटादावपि तत्सत्त्वेन योरन्वयव्यतिरेकाभ्यां हेतुत्वसिद्धेः तत्कार्यतावच्छेदकं कार्यत्वमेव लाघवात् कालेऽप्यनेन घटादी
नामानन्त्यात्। शरीरलाघवमपेक्ष्य संग्राहकत्वलाघवस्य बलवत्त्वात्। कृतेरपि यद्विशेषयोरिति न्यायात् सामान्यतो हे
तुत्वसिद्धिरिति। स्वीकृतिकृतत्वस्य घटत्वावच्छिन्ने कृतित्वेन हेतुत्वे परखण्डघटाद्युत्पत्तिः स काले कुलालादिकृतेरसत्त्वा
दीश्वरकृतिसिद्धिरित्याहुः। तन्न द्वित्यं कुलालादिकृतेः स्वप्रयोज्यविजातीयसंयोगेन कारणत्वात्। न चैवं वैशेषिकनये श्या
मघटादिनाशोत्तरं रक्तघटाद्युत्पत्तिः पाककालोपाकजनपरमाणुद्वयसंयोगध्वंसाणुकादेर्नाशात्तत्र व्यंसंभवतीति वाच्यं। पूर्व
संयोगध्वंसपूर्वघटाणुकादिध्वंसान्यसमुत्तरसंयोगद्व्यणुकादावन्ततः कालोपाधितयापि जनकत्वात् तत्कालेऽपि कुलालादि
कृतिप्रयोज्यविजातीयसंयोगेन सत्त्वात्। अन्यथा घटत्वावच्छिन्ने दण्डादिहेतुत्वमपि न स्यात्। अस्त्वदण्डादे

स्वाश्रयेऽन्यविजातीयसंयोगेन हेतुत्वं कृते सकललाघवाद्विशेष्यतयैकत्वं न च कृत्यात्मकतिमयात्तत्कालेऽस्तीति चेन्न । विजातीयसंयो-
गसत्वेन संबंधत्वेपि गौरवाभावात् निश्चितव्यभिचारात्वात्स्वप्रत्यायेऽन्यत्वं तु संबंधसंबंधः । किंच घटत्वाघवच्छिन्ने विजातीयकृतित्वेनैव
हेतुत्वेन हुकृतित्वेन व्यापकधर्मस्यो निर्दिक्तः । अथैवं शरीरत्वेन चेष्टात्वेन हेतुत्वान्नित्यशरीरादेकमपि स्यादिति चेत् सा । किं न ष्टुत्रं । न हि
तयोर्नित्यत्वज्ञानादिनित्यत्वबाधकापत्तिं विद्धि शेषाभावयव्यतिरेकाभ्यां सामान्यतो हेतुत्वसिद्धौ शरीरत्वादिनापि हेतुत्वं स्यादि-
त्येवमासेप इति चेन्न कथं स्यादिति वाच्यमायुष्मता बाधकादिति चेत् । किं तच्छरीरत्वाद्यवच्छेदेन जन्यत्वमिति चेत् तुल्यं ममापि । व-
स्तुतः परमाणव एव अप्यत्ववदीश्वरात्मसंयोगाधीनचेष्टावन्त ईश्वरस्य नित्यानि शरीराणीत्युक्तं तमेतदाचार्यैरपि टीकाप्रथमश्लो-
कव्याख्याने चेष्टाया नित्यत्वे हुमानाभावः । अनित्यचेष्टायाः अपि सर्गादौ संभवात् । वायुपारमाणव एव वा नित्यक्रियाचेत्तस्ता-
था त एव तेषां सदागतित्वं ईश्वरप्रयत्नाधीनचेष्टावतां सर्वेषामेव चेश्वरशरीरत्वमत एव सर्वावेशपरा सर्वीमेदकृतिः भ्राम-
यन् सर्वभूतानीत्यादिकमपि साधु संगच्छते । आकाशशरीरं ब्रह्मेति श्रुते । आकाश एव तच्छरीरमित्यन्ये । अत एव कृस्मादिश-
रीरचेष्टाविशेषहेतुकृत्याश्रयत्वेनापि ईश्वरसिद्धिः । न च नानाविधचेष्टायो नानाविधकृतेर्हेतुत्वान्नैकविधनित्यकृतेस्त-
द्धेतुत्वं एकस्याएव कृतेस्तादृशतादृशचेष्टानिष्पकारतागनिरूपितविशेष्यतया तादृशतादृशचेष्टाहेतुत्वात् । अत एव विं-

शत्यं गुल्मवच्छेदेन विंशतिप्रयत्नस्वीकारो दीधितिकृतो विफलः तादृशतादृशचेष्टासाधकेनैकेनैव नानाविधचे
ष्टासंभवात्। न चैवमपि नियतेच्छाकालनियमासंभवः तत्तत्कालीनतादृशतादृशचेष्टादर्शनादस्मदादेस्ता
दृशचेष्टाविषयककृत्युत्पादेऽपि न तादृशचेष्टेति किल ससाक्षात्तेरेव तद्धेतुत्वं। न स्या चाभ्यासपाटवेऽपि तत्रासिसि
चावां। आवश्यकाऽस्मदादिना तादृशचेष्टायामेवाभ्यासपाटवयोस्तत्रात्वात्। युक्तं चैतच्छ्राधितडीमहतकरादेः कुला
लादेस्तु व्यवसायदुःखादिकार्यसिद्धं तादृशकृतिसत्त्वेऽपि तादृशचेष्टानुदयादन्यथाकृतिविलोपापत्तेः। न चैवमस्म
दादिचेष्टाया अपि न स्यादेवं संभवे तत्प्रयत्नवैफल्यं। असंभवे तु भवेदृष्टत्वात्। अत एव न जीवनप्रयत्नसिद्धिः। एतेना
स्मदाद्यदृष्टवदात्मसंयोगादेव कस्मादिशरीरे क्रियैव न तु चेष्टेत्यपास्तं। नानाविधक्रियाहेतुनानाविधादृष्टस्वीका
रे गौरवात्। चेष्टात्वलोपापत्तेः। कालनियमासंभवाच्च। एवं च घटत्वाद्यवच्छिन्नेऽपि विलक्षणचेष्टात्वेनैव हेतुत्वं कृतिवै
जात्ये मानाभावात्। तादृशचेष्टावत्त्वमेव कुलालत्वादिकं। अत एवाद्यकुलालादिरूपजयापाद्यस्य सिद्धिः। अत ए
व नमः कुलालेभ्यः कर्मारेभ्यश्चेत्यादिश्रुतिरपीति युक्तं। नमः। पंथाः। अथैवमिष्टसाधनतानुमितेरपि हेतुत्वादनुमि
तिरपि। निम्यास्यादिति चेन्न इष्टसाधनताप्रत्यक्षादेरपि हेतुत्वात्तदनुमितित्वेनाहेतुत्वात्। स्योदनतुपादान

प.मा
१००

जन्यत्वं लौकिकमेव जनकमिति लौकिकत्वेनैव जन्यत्वे हेतुत्वाल्लौकिकप्रत्यक्षमीश्वरे सिद्ध्यतु यदि च प्रणिधानाद्यर्थं म
नोवह्नाद्यादौ प्रवृत्तिस्वीकारस्तु मित्यादिसाधारणं यद्धर्मावच्छिन्नं यत्कर्तृप्रवृत्तित्वं तद्धर्मावच्छिन्ने तदुपादानत्वप्रका
रकज्ञानमात्रं हेतुरिति मतं तन्न देश्वरे ज्ञानमात्रमायाह्नतद्यत्यक्षमिति वेन्नसत्यापक्षपातस्य च तु: सन्निकर्षात्यकृता
दृष्यादिना प्रत्यक्षसिद्धेस्तर्हि चाक्षुषादिकमायातं त्विति चेन्न चक्षुरित्यनेन च क्षुरादिव्यतिरेको न्केनस्तज्ज्ञानावच्छेद
कजात्यवच्छिन्नाभावलब्धे देशपादेः प्रत्यक्षमात्रपरत्वात् प्रत्यक्षत्वं तु नेन्द्रियजन्यतावच्छेदकं मानाभावात् नवा ज्ञान
त्वादिकं मात्मादेर्निखिलकार्यजनकज्ञानादेर्लाघवादेकत्वस्य नित्यत्वस्य च सिद्धेः ॥ किंतु जन्यज्ञानत्वादिकं
प्रामाणिकगौरवस्यादोषत्वात् । अन्यथा सृष्टत्वादिनैव जलादिजन्यत्वे नित्यस्नेहाद्यपि विलीयेतेति दिक् । अथ
किमिदं ज्ञानेऽएकत्वं न संख्या साक्षाद्वाधात्परंपरया तु नानात्वविरोधित्वात् । नापि नित्यज्ञानत्वं वैशिष्ट्यभेदप्रतियो
गितानवच्छेदकतद्व्यक्तित्वं वा तत्त्वं तस्य तज्ज्ञानावृत्तिनिष्ठत्ववत्त्वं वा नित्यज्ञानसिद्धेः प्रागतत्ज्ञानाभावादनुमिता
वेतद्वैशिष्ट्यभानासंभवादिति चेन्न । आत्मा नात्मवृत्तिभिन्नदुःखवद्वृत्तिद्वित्वासामानाधिकरण्यस्य ज्ञाने तादृश एम
द्वित्वस्य अन्यत्वस्य तदाश्रयोऽतत्वात् । भिन्नांतं ईश्वरघटादिद्वित्वस्यात्पत्तमीश्वरजीवद्वित्वस्य वारणाय । घटपटा २००

दिद्धि त्वं चेदृशं प्रसिद्धं । ज्ञानेच्छायत्नत्रितिमत्त्वं ज्ञाने आत्मत्वं पाद्रज्ञिनित्यज्ञानत्वावच्छिन्नाधिकरणतावत्त्वं तदाश्रये एक
त्वमिति तु मुक्तं ।। इदं तु न संगतं तत्कार्याणां देशकालादिनियम ईश्वरज्ञानेच्छादिनएवेति तन्निसिद्धिः । वदंति हि पामरा
अपीश्वरेच्छैव नियमिकेति । किंच निखिलवेदार्थदर्शिनो वेदकर्तुर्भगवतो ऽप्रलापोऽपि दृष्ट इति । तथा च पद्ये । समालोच्य
स्तु देहेष्वपि भवनं नार्थस्य भवनेनियोगात् तानामिति समये देशस्थितिलयं । अपि केचिद्ध्यं प्राज्ञाः सततमपि मीमांसनं तु प्रेषां व
स्थानं तत्कार्ये जगति जगदीशापरिचयः १ विभाव्य भवनेऽस्य परमेशनिदर्शनात् तयोनमन्तु ते मंदाः सन्ते नैव विदंति वि
तदत्र धिक् कारिमेत्यास्थेत्यलं कथाव्याख्यायामनुसर्येयमनन्तरेभ्योऽतिरिक्तमनस्त्वानां मनस्त्वं च जातिविशेषो नि
स्पर्शी गुणत्वं द्रव्यवद्भिन्नगुणत्वं वा । तच्च संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्कारवत् । विभागांत
द्रव्यत्वादेव सिद्धा मूर्तत्वाच्च परत्वापरत्वसंस्कारा अपि प्रयत्नज्ञानायोगपद्यायप्रतिशरीरमेकैकं अपि मायांच सुखादि
साक्षात्कार इंद्रियजन्यजन्यसाक्षात्कारत्वात् । रूपादिसाक्षात्कारवदित्यनुमानं । न च स्वप्रयोज्यवैषयिकसुखदु
राचक्षुरादिजन्यत्वेन सिद्धसाधनं अप्रयोजकत्वात् । सुखादिसाक्षात्कारो न चक्षुर्जन्यः रूपवदन्यसमवेतगुणसाक्षात्का
रत्वात् स्पर्शसाक्षात्कारवदित्यनुमानेन प्राक्च चक्षुरादिजन्यत्वबाधावतारात् । अत्र त्वत्तंत्राः । नोक्तानुमानान्मनः

प.मा सिद्धिः। इंद्रियत्वस्य मनोगर्भत्वात्तदसिद्धौ साध्याप्रसिद्धेः। साक्षात्कारकारणविषयनिरूपितसन्निकर्षाश्रयत्वं साक्षात्कारकार
२०० णशरीरसंयोगाश्रयत्वं वेंद्रियत्वमिति चेन्न। साक्षात्कारकारणरूपादिसन्निकर्षासंपृक्तशरीरेण मनसो सिद्धसाधनादर्थां
१०१ तराद्वा। अथ वा नीद्रियत्वेन तद्विशेष्यात् ज्ञ्चेद्‌निर्विकल्पकाविषयत्वमिति चेन्न। त्वचासिद्धसाधनात्। न च स्पर्शाविषयकसाक्षा
त्कारत्वेन त्वगन्यतादृशजन्यत्वं साध्यं। अप्रयोजकत्वात्। अन्यथा सुखाविषयकदुःखादिसाक्षात्काराणां विभिन्नेंद्रियजन्यत्वा
पत्तेः। ज्ञानसामान्यजनकस्य शरीरादेस्तद्विशेषावच्छिन्नं प्रति जनकत्वे त्वचो मनसो वा स्पार्शनमानसं वा प्रतीत्वाविरुद्धं जन्य
ज्ञानत्वावच्छिन्ने त्वगादिना स्पार्शनत्वाद्यवच्छिन्ने त्वगिंद्रियत्वादिनान्यथात्वमिति चेन्न। त्वगादिप्रवेशे इंद्रियत्ववैयर्थ्यान्
त्वगिंद्रियत्वादिना हेतुत्वे इंद्रियत्वेनेंद्रियजन्यत्वजन्यसाक्षात्कारत्वेनैव संभवतः। न्यथा तु किं न तत्तन्त्रमिति चेत्किं तन्त्रं ज रा६
देतप नकं चेत्। न किं चित्। व्यापकं चेत्। ज्ञानत्वादिव्यापकं चेत्। चाक्षुषत्वादिसमकं प्य चेत्। साक्षात्कारसाम[redacted]
ग्रीजन्यत्वादिनं तदवच्छिन्नोत्पत्तिनियामकं चेत्सामग्री यथा जन्यज्ञानत्वावच्छिन्नोत्पत्तिनिर्यामिकात्मा सामग्रीतदवच्छिन्नं प्रतिज
नकं चेदात्मशरीराद्येकरूपावच्छिन्नस्य कथं सामान्यविशेषोभया[redacted]वच्छिन्नजनकत्वमिति चेत्कतमो विरोधः। न चैवं पृथिवीत्वा
दिना कपालादेर्घटादिजनकत्वापत्तिः। संभवत्येव व्याप्यरूपेण हेतुत्वे व्यापकरूपेणान्यथासिद्धत्वात्। विरुद्धरूपसमवच्छिन्न
स्य शीदिसुखादिसाक्षात्कारोपि प्रत्येकरूपावच्छिन्नस्य कथं हेतुत्वमिति चेद्यथा त्वक्संयोगस्य रूपादिकं प यावा त्मनः सु राम

२०१

३४

स्यादिकं प्रति। कथं तर्हि कार्यवैलक्षण्ये तद्वदेव सामग्रीवैलक्षण्यादिति गृहाण। आत्मत्वं वा प्राणस्य सुखादिसमवायिका-
रणं। अथ भावकार्यस्य समवायिकारणकत्वनियमात् सुखादीनां तदावश्यकं। तत्र परिशेषात् सुखादिकं संयोगासमवायि-
कारणकं वृत्तिगुणत्वव्याप्यजातिमत्त्वात्। विभुविशेषगुणत्वान्नित्यत्वस्यानित्यविशेषगुणत्वाद्वा शब्दवत्। पाकजवद्वेत्यनुमा-
नाच्च संयोग एवेति तदाश्रयत्वेन मनःसिद्धिरिति चेन्न। कार्यैककारणप्रत्यासत्त्यैकार्थप्रत्यासत्त्या कारणत्वादिरूपस्यासमवायिका-
रणत्वस्य कारणतानवच्छेदकत्वात्। भावकार्यमात्रे न नियमः। भावान्तु सुखादेरन्यथात्वात्। अवयवरूपादिकं विनावयविनि
रूपादेरवयवसंयोगादिकं विनावयव्यादेरनुत्पन्नेरतश्च तत्कार्यविशेषे तत्कारणविशेषस्य हेतुत्वात्। न चैवमवयवैकत्वा-
द्यवेक्षत्वादेरसमवायित्वं न स्यादिष्टत्वात्। जन्यैकत्वावच्छिन्ने एकत्वाभावस्याधेयतया द्रव्यस्य वा हेतुत्वेनैव जन्यद्रव्य-
मात्रे तदुत्पत्तिसंभवात्। आत्मत्वं वा शरीरस्य प्राणस्य वा प्राणसंयोग एव तथा। न चैवं सुखादिमात्रस्य शरीरादिव्यापित्वापत्तिः। मन-
ःसंयोगस्य तथात्वेप्यण्वादेशतापत्तेः। न च विभुकार्यस्य निमित्तं प्रादेशिकात्वावधानप्राणो देशिकत्वेपि यावत्समवायि-
कारणत्वावच्छिन्नावश्यकत्वमिति वाच्यं। मानाभावात्। ध्वनसंघट्टे ह्यादिजन्यशब्दसन्तानां निमस्याद्यशब्दे देशपर्यन्तं तत्त्वापत्तौ
निकटस्थस्यापि दूरस्थस्येवमदशब्दोपलब्ध्यापत्तेश्च। अथ यथासंगृहशायांचा- हेरीदीनां स्वस्वविषयसंवद्धानामप्येकमेव
ज्ञानं जनयति नेतीराणां त्वनुभविकतेन यस्यासन्निकर्षादितरेषां ज्ञानाजनकत्वं तन्नेषां क्रमेण। अधिष्ठापकं मनस्तदेवसु

प.मा
२०२
१०२

खादिसाक्षात्कारकारणां तथा च पारमर्षं सूत्रं युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमिति। बुभुत्सावशात्तथा नियमः। वनिचेत्ययं च बुभुत्सा
यां पंचज्ञानानि स्युः। भवत्वेव पञ्चावधानवतामिति चेदन्यस्यापि स्यात्। तस्मात्तत्र दीर्घशष्कुलीभक्षणे च कल्प्यते ज्ञानक्रमः। योग
पद्यधीर्क्क धीतावाक्षकवलात्। न च ज्ञानस्य कारणाकारणावा एकत्रात्मनि शरीरे वा एकदैकमेव ज्ञानं जनयति इति नियमोन्यथा
समूहालंबनमप्येकं ज्ञानं न स्यादिति तत एव व्यासंगे एकं ज्ञानमिति वाच्यं कार्यानुत्पादस्य दिनाकारणाभाव मसंभवात्तस्मा
न्मुख्यसत्त्वे कार्योत्पत्ते ईंबीरत्वात्। न च तदेतरेषां ज्ञानानां तु राज्ञ नकत्वात्तत्सामग्रीसंभवधानात्। तत्तत्कालीनत्वाद्देजनकतान
वच्छेदकत्वेन तत्स्वरूपयोग्यतायाः दुर्वारत्वात्। स्वरूपयोग्ये च फलानुपधानस्य सहकारिविरहप्रयुक्तत्वात्। समूहालंबनं
वनं तु घटपटादिज्ञानस्य मध्ये समाजाक्रापमानमविरोधात् लाघवाच्चैकमेव नानाविषयकमुत्पद्यते। चाक्षुषस्पार्शनादिका
नं तु नैकं जातिविरोधादिति चेत्। रसनसंयोगदशायामारोपे चक्षुर्बुभुत्सायामसत्यामेव चक्षुर्मनःसंयोगे पि मनसस्त्वचासंयोगसत्त्वा
द्युगपदेव न कथं रसस्पर्शसाक्षात्कारौ अदृष्टवशादिति चेद्व्यासंगेपि तथास्तु। अपि च रूपादिकं पश्यतो जातायां गीता
दिषु बुभुत्सायां सत्यामेव कुतो गीतादिश्रवणं बुभुत्सावशादिति चेत्। श्रोत्रमनोयोगं विनाश्रावणज्ञानासंभवात्। न
हि बुभुत्सा हठात्त्वेव श्रोत्रमनोयोगं कुरुते। अथ बुभुत्सायां सत्यां अभिमतबोधकारणामनःसंयोगार्थं मनो वहनाड्याम

राम
२०२

३४

यत्नो जायते तया तु न्न च मनः क्रमेणानेनेंद्रियेणासंयुक्तेन ततो वुभुत्सितार्थबोध इति चेत्स(किं) पामरान्प्रति इंद्रियमनःसंयो
गस्य कारणत्वं विदंति। अथ सर्वज्ञा वा किमिदानीमस्मानाज्ञा मनो विघ्नेन संयोगस्य न चेतनेंद्रिये णेति निश्चिनोति किं
चादरेण रूपादिकं पश्यतो वेगवत्तरमहामेघसंघट्टजन्मनो ऊरणान्द्र रणांशब्दस्य झटित्येव कथं साक्षात्कारः। जन्मा
दृष्टशब्दे वृथा संगादो ज्ञानोत्पादनियमः। अत एव शष्कुलीभक्षणे रूपरसादिसाक्षात्कारणां यौगपद्यप्रत्ययो
न भ्रांतः। युगपदेव चादृष्टानां वृत्तिनिरोधान्सुस्वापो वृत्तिलोभाच्च जागरणं। अदृष्टविशेषपरिपाकवशाद्वा
न तदानीं ज्ञानोत्पादः मनसो निरिंद्रियप्रदेशे गमने त्वया पितत्स्पर्शस्य कारणं यत्नात्। तस्मान्मनःसिद्धावप्र
तेरेवमारब्धाः कुः॥ केचित्तु। मौलिका एव परमाणवो वा एवो वा मनांसि तेषां च ज्ञानादिहेतुतानडूपेण पृथिवीत्वा
दिनासंकरायत्त्या जातेरसंभवात्। अनंतानां धर्मिणामतिरिक्ताया अश्व जातेः कल्पनामपेक्ष्य क्लृप्तानामेव ध
र्मिणां क्लृप्तेनैव रूपेण हेतुतायाम्लाघवत्वात्। नियमः पुनरदृष्टविशेषोपग्रहात्तदानीमनारंभोपि तेनैव व्यवति

प॰मा २०२ निबंधादित्याहुः। अत्र वदंति यन्मनःसंयोगव्यतिरेकात्सुषुप्तिकाले ज्ञानानुत्पादो यस्य च स्वप्नवहनाड्यां संयोगे स्वात्मं शरी

नं नाडीविशेषसंयोगाच्च मूर्छितदेव मनः। न च शरीरादिकां तथा शरीरादिसंयोगस्यात्मा नित्यत्काले ऽपि सत्त्वात्।

अथोदासीनानंतमनसामयि संयोगस्तत्काले ऽस्तीत्यदृष्टविशेषाकृष्टं मन एव तथा वाच्यं। तथा च तत्पुरुषादृष्टाकृ

103 ष्टं भौतिकाणुरेव तस्य मनो ऽस्त्विति चेन्न। तस्य भौतिकत्वे पृथिवीत्वं जलत्वे वेत्यत्र विनिगमकाभावात् पृथिवीत्वादि

राहित्यासिद्धेः। न च मनये रूपादिरहितस्यापि पृथिवीत्वादिसंभवेन रूपादिमत्त्वाद्वायुरेवेत्युक्तं। अन्यथा स्प

र्शराहित्यात्त्वाद्वायुरित्यपि सुवचं। किंच ज्ञानादिजनकात्मप्रतियोगिकविजातीयसंयोगप्रतिमनस्त्वेनैव ज्ञात्वेन

हेतुत्वेन तत्वैजात्यस्य पृथिवीत्वादिविरुद्धमिति। एतेन विजातीयशरीरादिसंयोग एव ज्ञानजनक इत्यपास्तं। शरी

रादिसंयोगे कर्मजत्वादिना सांकर्याद्धि जात्यसमवायित्वस्यादेनम्। तत्पुरुषीयदृष्टजन्यसमवेतादिमानसत्वेनदात्म

तदात्मसमवेतत्वादेरेव नियामकत्वेनानतिप्रसंगात्। भावकार्यमात्रे सामवायिकारणाकुलनियमस्याभा राम २०२

भावाच्चात्ममनःसंयोगस्य ज्ञाननियामकत्वमेवासिद्धं। सुषुप्तिकाले ज्ञानानुत्पादस्तत्कालविशेषस्य विरोधि

प.मा
२०४
10५

त्वादिति चेन्नात्रानंतकालविशेषणानां विरोधित्वकल्पनामपेक्ष्य जन्यज्ञानमात्रे विज्ञानीयात्ममनोयोगहे
तुत्वकल्पना घाटवयुक्तत्वादिति शिवं ॥ ❀ ॥ भाष्याद्युक्तिषु हीनयुक्तिषु रतिःतिः प्रेक्षावतां नेसातेत्या चार्य
विहितापि युक्तिरहिता वा याशाङ्कचिक्रल्पने मत्वैव जयराम एष विपुलैः सद्युक्तिमुक्ताफलैः प्रत्यक्षं विततान कोवि
दमुद्देशप्रार्थमालामिमां १ पदार्थमालां यदि नाम बाला लालावशादप्यनुशीलयंति तदा बृहत्तर्थपयोधि
पारं विना विचारं परिशीलयंति २ इति श्रीमहामहोपाध्यायश्रीजयरामन्यायपंचाननभट्टाचार्यविरचि
तायां पदार्थमालायां द्रव्यपरिच्छेदः समाप्तोयं ग्रंथः ॥ ॥ ❀ १ ४ ❀ ४ ॥ ४ ॥
॥ श्री ॥ ॥ श्री ॥ ❀ ॥ ❀ ॥ ॥

राम
२०४

पत्र २१ खंडित न्यायमी पदार्थमाला

प २.३ [illegible]

गणेशगाडगीलस्येदंपुस्तकं

न्याय पदार्थमाला

श्रीः